PK
531
A15
1899
v.1
pt.6

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 970.



महाभाष्यप्रदीपोद्योतः ।

MAHĀBHĀṢYAPRADĪPODYOTA

BY

NĀGEÇA BHAṬṬA

EDITED BY

PANDIT BAHUVALLABHA ÇĀSTRĪ.

VOL. I, FASCICULUS VI.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1900.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS. MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi. (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each		4	2
Aitarēya Āraṇyaka of the Ṛg Vēda, (Text) Fasc. 1–5 @ /6/ each ...		1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, Fasc. 1–5 Vol. IV, Fasc. 1–5 @ /6/		7	8
Anu Bhāṣyam, (Text) Fasc. 1–5 @ /6/ each		1	14
Aphorisms of Sāṇḍilya, (English) Fasc. 1		0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...		2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each		1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. 1–5 @ 1/ each		10	0
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each		1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–2		0	12
Brahma Sūtra, (English) Fasc. 1		0	12
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each		1	8
Brhaddharma Purāṇa. (Text) Fasc. 1–6 @ /6/ each		2	4
Catalogue of Sanskrit Book MSS. in the Society's Library, Fasc. I and II @ 2/		4	0
*Caturvarga Chintāmani (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II. Fasc. 1–10 @ /6/ each		19	14
Çlokavartika, Fasc. I		0	6
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–14 @ /6/ each ...		4	2
* Ditto Lāṭyāyāna, (Text) Fasc. 1–9 @ /6/ each		3	6
Ditto Çānkhāyana, (Text) Vol. I. Fasc. 1–7; Vol. II, Fasc. 1–4, Vol. III, Fasc. 1–4 @ /6/ each		5	10
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6 each		1	2
Gadadhara Paddhati Kālasāra Vol I. Fasc. 1		0	6
Kāla Mādhava, (Text) Fasc. 1–4 @ 6/ each		1	8
Kāla Viveka. Fasc. 1–4		1	8
Kātantra, (Text) Fasc. 1–6 @ /12/ each		4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each		10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each		3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each		2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...		4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–5 @ 6/ each		1	14
Manutīkā Saṅgraha, (Text) Fasc. 1–4 @ /6/ each		1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–6 @ /12 each		4	8
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each		4	14
Nārada Smṛti, (Text) Fasc. 1–3 @ /6/		1	2
Nyāyavārtika, (Text) Fasc. 1–4 @ /6/		1	8
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...		5	4

तद्विवृणोति

नवेति यत्प्रतीयत इति। (भा)

स लौकिकोऽर्थ इति शेषः ॥

यद्यपीति। (कै)

एवं च "स्वस्मात् पदार्थाद्" इत्यनुपपन्नं सर्वस्यापि स्वपदार्थत्वात् प्रच्युतिस्त्याऽनुपपन्नेति भावः। त्यागोनास्तीति चार्थान्तरग्रहणाऽभावस्याऽप्युपलक्षणम् ॥

प्रसिद्धिवशादिति। (कै)

लोकप्रसिद्धौव तत्र स्वपदार्थत्वव्यवहारस्तेषामेवास्यायं प्रसिद्धोऽर्थस्त्यक्तोऽप्रसिद्धश्च गृहीत इति प्रसिद्धा भाष्ये प्रच्युत्यङ्गीकारावुक्तौ इति भावः। वस्तुतो न प्रच्युत्यादिकमित्याह

तत्त्वत इति ॥ (कै)

सादृश्यादिति। (कै)

अर्थभेदाच्छब्दभेद इति पक्षे इदम्। एकशब्दत्वे त्वभेदादिति बोध्यम्। वस्तुतः प्रच्युत्यङ्गीकारौ तयोरर्थयोर्बोधाविषयत्वबोधविषयत्वे एव न तु मुख्याविति बोध्यम् ॥

पदार्थविपर्य्यासकृदिति। (कै)

लोके शब्दविशेषणकार्थप्रतीतिः शास्त्रेऽर्थविशेषणकशब्दस्य। [1]इति शब्दसमभिव्याहारे विपरीतमिति विपर्य्यासः। भाष्येऽपि "स्वस्मात् पदार्थात् प्रच्युत" इत्यस्य विशेषभूतादिति शेषः।

१ इति समभिव्याहारे। क। ग ॥

अन्यथार्थप्रतीतेश्शब्दानालिङ्गिताया अभावेन एतदसङ्गतिः स्यादिति दिक्॥ इति करणस्याऽर्थनिर्देशार्थत्वे स्थिते नैव समानानां शब्दानां प्राप्तिरत आह

समान इति॥ (कै)

प्रत्यग्रेति। (कै)

यद्यपि नचेह वयं विभाषा ग्रहणेन सर्वादीन्यभिसम्बध्नीम इति भाष्यपर्य्यालोचनया सर्वादिविशेषणत्वलाभात् प्रत्यग्रत्वं समासविशेषणमयुक्तं तथापि दिग्वाचकसर्वादीनामर्थस्य दिशो नवपुराणत्वाऽसम्भवादुदाहरणपरभाष्याच्च तच्च [१]"सर्वादीनि" इत्यनेन तद्घटितसमासो लक्षणीय इति भावः॥

तन्निमित्त इति। (कै)

लक्षणेत्यर्थः॥

तदा संज्ञेति। (कै)

[२]"न बहुव्रीहौ" इति निषेधे प्राप्ते इदं नित्यार्थं स्यादिति भावः॥ भाष्ये

अचिरकृतायामिति। (भा)

तस्यां बोध्यायामित्यर्थः॥

संप्रत्ययः स्याद् (भा)

इत्यस्य संज्ञाया इति शेषः॥ ननु प्रदेशे [३]"विभाषा दिग्"

---

१ अ १। पा १। सू २७। २ अ १। पा १। २९॥
३ अ १। पा १। सू २८।

(अ १। पा. १। आ. ६) (नवेति विभाषा। १। १। ४४।)

इत्यादौ न नवाग्रब्द उच्चारितो "नवेति विभाषा" इति सूत्रे तु न किं चिद्विधायोक्तं पूर्वोत्तरसाहचर्य्येणास्य संज्ञासूत्रत्वादित्यत आह

प्रदेशेति ॥ (कै)

इयं संज्ञेति। (कै)

"नवेति विभाषा" इत्येतत् संज्ञासूत्रार्थ इत्यर्थः ॥ "कार्य्याणि" सर्वनामसंज्ञादीनि ॥ "नवार्थम्"। नवाग्रब्दार्थम्। विभाषाग्रब्दस्याऽर्थसंज्ञात्वात्। क्वचित्तु तथैव पाठः ॥ भाष्ये "न वा इत्युच्यते" इत्यस्य तदर्थबोधको विभाषाग्रब्द उच्यते इत्यर्थः ॥

प्रतिषेधवाचिन इति। (भा)

प्रतिषेधवाच्ययं ग्रब्द इति प्रत्ययो भवतीत्यर्थः ॥

न त्विति। (कै)

एवं च प्रदेशानुगुण्येन प्रकृतसूत्रेऽपि न [1]प्रत्ययवाचिनो ग्रहणमित्यर्थः ॥

भिन्नेति। (कै)

अग्रे "समानलिङ्ग" इति दर्ग्रनाद्विग्रब्दो भिन्नार्थ इति भावः ॥

न त्विति। (कै)

अव्ययत्वादिति भावः ॥

नैवेति। (कै)

भाष्ये "क्वचित् क्रियत" इति "एतच्चैव न जानीम" इत्यन्वयः।

---

१ प्रत्ययवाचिनः। क ॥

नवा विधीत्युक्तवतोऽयं ग्रन्थः । एवं च शास्त्रे समानलिङ्गनिर्देशस्य क्वाप्यभावान्न क्वापि प्रत्ययार्थावगतिरित्याशयः ॥ ननूभयविधान्वय-संभवे कथमन्यतरनिर्णय इत्यत आह

तत्रेति ॥ (कै)

अप्राप्ते यवागूभोजन इति । (कै)

अकर्त्तव्यत्वेनाऽवगते इत्यर्थः । प्ररोचनायेति शेषः ॥

न तु तदङ्गमिति । (कै)

भवतिक्रियाकर्त्तुरुद्देश्यरूपं तदङ्गमित्यर्थः ॥ भाष्ये

विभाषा भवन्तीति । (भा)

अत्र विभाषेत्यग्रे सर्वनामानीति शेषः ॥ "भवन्ति विभाषा" इत्यस्य सर्वनामानीत्यादिः ॥ ननु दिक् समासेऽपि नित्यनिषेधे "न बहुव्रीहौ" इति सामान्यसूत्रेणैव सिद्धे "विभाषा दिग्" इति सूत्रस्य वैयर्थ्यापत्तिरित्यत आह

परिहारान्तरेति । (कै)

इति सिद्धे "विभाषा दिग्" इत्यसम्बद्धं स्यादित्यर्थः ॥ ननु प्रसक्तस्य निषेधेऽभाव एव दृष्टो न तु विकल्पोऽत आह

प्रतिषेधादिति । (कै)

"विभाषा श्वेः" इत्यादौ पित्त्विषये विधेरनुमानं करिष्यत इत्यर्थः । निषेधानुपपत्तिकल्पितशास्त्रेण प्रसज्येति वार्त्तिकार्थ इति

---

१ कर्त्तुरुद्देश्यरूपम् । क । ख । ग । ङ ॥

२ अ ६ । पा १ । सू ३० ॥

भावः। एवं च षोड़शीग्रहणाग्रहणवदेकविषयत्वाद्विकल्पसिद्धिरिति तात्पर्यम् ॥

तत इति। (कै)

अन्यथा [1]कल्पितशास्त्रं व्यर्थं स्यात् प्रक्षालनाद्धीति न्याय-विरोधान्न निषेधार्थमेव तदिति भावः ॥ ननु विकल्पो विरुद्धविषय एवेति किमुच्यते "विप्रतिषिद्धं लि"ति अत आह

एकेति। (कै)

युगपदिति शेषः ॥ विप्रतिषेधोपपादकं भाष्यम्

अत्र नेति ॥ (भा)

प्रसजति। (भा)

भावमिति शेषः॥ "प्रसज्यते" इति प्रसङ्गो विधिः "प्रतिषेध-विषयाद्" इत्यस्य कालविशेषविशिष्टात्ततोऽन्यत्र तत्रैव कालान्तर-विशिष्टे इत्यर्थः। निषेधसामर्थ्यलब्धोऽयमर्थः॥ सामर्थ्यात् प्रतिषेध-विषयात् अन्यत्र विधिरित्युक्ते यत्स्खलितं तदाह

प्रतिषेधसामर्थ्याच्चेति ॥ (भा)

इदमपि पूर्ववद्व्याख्येयं तद्वनयन्नाह

पर्य्याय इति ॥ (कै)

भाष्ये

याहि प्राप्ते इति। (भा)

केवलोभयत्र विभाषारूपा वेत्यर्थः ॥

---

१ अन्यथा कल्पितं शास्त्रम्। क। ङ ॥

कृतसामर्थ्य इति । (भा)

"पूर्वेणैव" । कृप्रग्राह्येणैव । विधिः कृतसामर्थ्यो विहितविधिकल्पकनिषेधीयग्रन्थिक इत्यर्थः । एवं च तत्र विधिकल्पनाभावात् प्रतिषेधमात्रप्रत्ययः स्यादिति भावः । एतद्भाष्यादपि सामान्यग्राह्यप्राप्तनिषेधे विकल्पं वदन्तो मीमांसकाः परास्ताः ॥ "महत्याः संज्ञाया" इति भाष्येण संज्ञैव न कर्त्तव्येति विवक्षितं न तु लघ्वी कर्त्तव्येतीत्याह

यदि हीति ॥ (कै)

समुदायस्येति । (कै)

प्रत्येकधर्मावच्छिन्नस्योभयस्येत्यर्थः ॥

विकल्पप्रतिषेधाविति । (कै)

प्राप्तविभाषाविषये इत्यर्थः ॥

विकल्प एवोपेति । (कै)

उभयोः संज्ञाकरणेऽपि निषेधस्यान्वयायोग्यत्वाद्द्वितीयस्यैवोपस्थितिरिति भावः । अत्राप्राप्तविभाषाशब्देन केवलाऽप्राप्तविभाषोच्यते ॥

युगपदिति । (कै)

अनवगतसंज्ञिद्वयक्रमोपस्थानस्य चोद्यमेतदित्यभिप्रायः ॥

भावाभावाविति । (कै)

इमावेव भाष्ये विधिप्रतिषेधशब्देनोक्तौ ॥ भाष्ये

पूर्वस्योत्तरेणेति । (भा)

पूर्वस्य प्रतिषेधस्य उत्तरेण विकल्पेन। बाधश्चात्र न निषेधप्रवृत्तिप्रतिबन्धः किन्तु तत्फलस्याभावनिष्ठसार्वकालिकत्वस्य प्रतिबन्ध इति बोध्यम्॥ नन्वेवमपि पूर्ववाक्येन नञ्शब्द एवादेशः स्यात् तत्रार्थपरत्वे मानाभावादत आह

इति करण इति। (भा)

एवं चोभयत्रापीतिशब्दान्वय इति भावः। एवं चार्थद्वयकसंज्ञाकरणसामर्थ्यादेव वाक्यभेदेन क्रमेणान्वय इति भावः। एवं च केवलप्राप्तविभाषायामुभयत्र विभाषायां च क्रमेण निषेधविकल्पयोरुपस्थितिः। शुद्धाप्राप्तविभाषायां तु निषेधस्यान्वययोग्यत्वाच्छुद्धविकल्पोपस्थितिरिति तात्पर्यम्। पूर्वं विकल्पाप्रवृत्तौ हेत्वन्तरमाह

आनुपूर्वी चेति॥ (कै)

अनुपयोगादिति। (कै)

"उभयगतिरिह" इत्युक्तेर्लोकगृहीतविकल्पग्रहणमेव सिद्धेरिति भावः॥

पक्षे निवृत्तिरिति। (कै)

एवं च तत्र निषेधतात्पर्यकतयैव प्रवृत्तिरिति भावः॥

अप्राप्तेति। (कै)

तत्र विधि तात्पर्यकतयैव प्रवृत्तिरिति भावः॥

पित्स्वेवेति। (कै)

तत्राप्राप्तेरिति भावः॥ एकस्योभयत्र तात्पर्यन्तु न सम्भवतीत्याशयः। भावतात्पर्यकतालोभेन पित्त्विषयतैव स्यादिति तत्त्वम्।

अस्योभयत्र विभाषाविषयत्वं भाष्ये [1]"विभाषा श्वेः" इत्यस्यैवोदाहरणदानेन बोधितम्। एवं च तदर्थमावश्यकेऽस्मिन् अन्यत्रापि स्वग्राह्यगृहीत सङ्केतेनैव बोधान्न या हि प्राप्ते विभाषा तत्रोभयमुपस्थितमित्याद्युक्तभाष्यविरोध इति दिक्॥ "साधुत्वप्रतिपादनाच्छास्त्रस्येति" पाठः। "शास्त्रस्य" इतिकर्तुः शेषत्वे षष्ठी। [2]क्वचित्तु साधुत्वप्रतिपादनार्थत्वाच्छास्त्रस्येति पाठः॥

प्राधान्यादिति। (कै)

यदिह परिनिष्ठितं तत्साध्विति [3]अर्थापत्तिकल्पितवाक्यस्यैव मुख्यत्वात्तेन मुख्यतया साधुत्वस्यैव विधानादित्याशयः॥

तदङ्गभूतानामिति। (कै)

तदुद्देश्यभूतानामित्यर्थः॥ भाष्ये

यस्य विभाषा क्रियत इति। (कै)

यत्सम्बन्धेन विभाषोच्यते इत्यर्थः॥

समासस्यैव हीति। (भा)

हि यतः समासो विभाषेत्युच्यते तत्र समासोद्देशेन साधुत्वविधानात् तस्यैव विकल्पः स्यादिति भावः। साधुत्वं च जातिविशेषः। समासप्रकरणीयविभाषाधिकारस्य भाष्ये प्रत्याख्यानादाह

[4]विभाषा श्वेरिति। (पा)

---

१ अ ६। पा १। सू ३०।

२ क्वचित्तु साधुत्वप्रतिपादनार्थत्वादिति पाठः। क। ख। ग। ङ॥

३ अर्थापत्तिकल्प्य वाक्यस्यैव। क। ग। ङ॥

४ अ ६। पा १। सू ३०॥

साधुत्वविकल्पे दूषणमाह भाष्ये

नचैवेत्यादिना ॥ (भा)

तद्व्याचष्टे

सर्वदा त्विति । (कै)

सादृश्याद् असाधुत्यागपुरस्सरं साधूपादानं दुष्करमित्यपि बोध्यम् ॥ तच्च साध्वनुशासन इत्युक्त्वा शब्दनित्यत्वपक्ष एवायं दोषो न तु कार्य्यत्वपक्षे इत्युक्तं तदुपपादकं "यस्य पुनः" इत्यादि भाष्यम्। प्राधान्यात् साधुत्वस्यैव विकल्पः स्यादिति यदुक्तं तत्राह

साधुत्वस्येति । (कै)

संज्ञायाः श्रुतत्वेन साधुत्वस्याऽश्रुतत्वेन श्रुतस्य श्रुतेनैव सम्बन्धस्य न्याय्यत्वात् प्रयोगाऽसमवायिलाभादिस्थले श्रुते विधेयत्वस्याऽवश्यकत्वाच्चेत्यपि बोध्यम् ॥

पशुत्वेति । (कै)

साक्षात् श्रूयमाणेऽपि अयोग्यत्वाद्यदा न सम्बन्धस्तदा किं वक्तव्यमश्रूयमाणेऽयोग्ये सम्बन्धो नेतीत्यर्थः ॥

अन्यचेति । (कै)

[1]समर्थसूत्रे ॥ "मुख्यः" प्रधानः ॥

अभिन्नार्थत्वमिति । (कै)

एवं च तदर्थं कञ्चित् साधुत्वेनाऽन्वाख्यायमानोऽनन्वाख्यातस्य तदर्थकस्यान्यस्य निवर्त्तकः स्यादिति तस्यापि साधुत्वार्थं विभाषा-

---

१ अ २। पा १। सू १ ॥

धिकार आवश्यक इति भावः । वाक्ये व्यपेक्षा परस्पराऽऽकाङ्क्षा-रूपा पदार्थानामपृथग्गुपस्थितिविषयत्वमेकार्थीभावो वृत्तिविषयः । एवं च वृत्तिवाक्ययोर्भिन्नार्थत्वान्न वाक्याऽनुज्ञानाय विभाषाग्रहणं किन्तु वृत्तिविषये एव संज्ञाविकल्पार्थं वाच्यं न च वृत्तौ संज्ञायाः स इष्यते तस्मादेकार्थीभावस्यैव मन्दमत्यनुग्रहाय स विशेषण-मिति तत्रोक्तातात्पर्य्यमित्यविरोध इति भावः ॥ भाष्ये

समाससंज्ञा (भा)

इत्यस्य तद्विषयैकार्थीभाव इत्यर्थः ॥ ननु युगपच्छब्दस्यैककाल इत्यर्थकस्य सप्तम्यर्थवृत्तेरन्वाचयशब्देनातादृशेन कथं द्वन्द्व इत्यत आह

युगपद्भाव इति । (कै)

कार्य्येषु शब्देषु यौगपद्यान्वाचयविषये तेषां यौगपद्यं युगप-त्प्रयोगः प्राप्नोतीति वार्त्तिकाक्षरार्थः ॥ भाष्ये "युगपद्वचनता" इति बहुव्रीहेस्तल् । "अन्वाचयेन" इत्युक्त्वा "ढक् च" इति समुच्चयोदाहरणमसङ्गतमित्यत आह

समुच्चय इति ॥ (कै)

स्वरितत्वेन चेति । (कै)

यथा [१]"काश्यादिभ्यष्ठञ्ञिठौ" इति वर्त्तमाने [२]"वाहीक-ग्रामेभ्यश्च" इत्यत्र ॥ नित्यशब्दवादे तु प्रयोगदृष्टानामेव शास्त्रे काल्पनिकविधेयत्वेनेष्टप्रत्ययविभागसिद्धिः । रेखागवयस्य [३]"आद्य-न्तौ" इति सूत्रे भाष्ये एव वक्ष्यमाणत्वात् ॥

---

१ अ ४ । पा २ । सू ११६ ॥ २ अ ४ । पा २ । सू ११७ ॥
३ अ १ । पा १ । सू ४६ ॥

व्यवहितेऽपीति। (कै)

लोके तथा दर्शनादिति भावः॥

आनन्तर्यमारोप्येति। (कै)

अनेन परादिशब्दानामव्यवहित एव प्रवृत्तिरत एव [१]"व्यवहिताश्च" इति सूत्रं सार्थकमिति भावः॥ शास्त्रे तु सर्वथा न व्यवहिते प्रवृत्तिरित्याह

निर्दिष्टग्रहणं त्विति। (कै)

तुशब्दार्थः॥ [२]"छन्दसि परेऽपि" [३]"परश्च" इत्यादावपि उत्तराङ्गविकल "तस्माद्" इति परिभाषाः प्रवृत्तेरिति भावः॥

कथं तर्हीति। (कै)

[४]सरूपसूत्रे इति भावः॥

एकाऽऽकृतीति। (कै)

आनुपूर्वी हि एकाऽऽकृतिरत्र॥ भाष्ये "नापि ब्रूम" इत्यस्य नैव ब्रूम इत्यर्थः॥ अर्थोऽपि समुदायस्येति शङ्कमानं प्रत्याह

तव्यदिति। (कै)

प्रत्ययादिसंज्ञा [५]"तव्यत्तव्यानीयर" इति बहुवचननिर्देशात् प्रत्येकमिति प्रत्येकमेव भावाद्यर्थकत्वमिति भावः॥

---

१ अ १। पा ४। सू ८२॥ २ अ १। पा ४। सू ८१॥
३ अ ३। पा १। सू २॥ ४ अ १। पा २। सू ६४॥
५ अ ३। पा १। सू ९६॥

पुनः पुनः संकीर्त्तनमिति । (कै)

अत्र पुनः पुनरित्यस्योपयोगश्चिन्त्यः । एकैकस्मिन् शास्त्रे तदभावाच्च । तस्मात् संकीर्त्तनमात्रमेवात्र शीलनमिति बोध्यम् ॥ तेन यत्कार्य्यमुच्यत इति वार्त्तिकाक्षरार्थः । अत एवाग्रे भाष्ये "तत्कीर्त्तने च" इत्येवोक्तम् ॥ तद्विषयत्वमुपपादयति

सर्वप्रयोक्तृति । (कै)

इको ह्रस्वो भवति तत्प्रयोक्तृत्वं "गालवस्य" इत्यादि क्रमेणार्थः ॥ भाष्ये

प्राक्षुचैवेति । (भा)

प्राग्देश एव फिन्प्रयोगः स्यादित्यर्थः ॥

अनादित्वादिति । (कै)

एवं च गालवातिरिक्तशिष्टैरपि प्रयुज्यमानत्वान्नियमासम्भवः । किं चैतत्पक्षे शास्त्रं रेखागवयन्यायेन कल्पितशब्दविषयमिति कल्पितशब्दे प्रयोक्तृनियमाऽसम्भव इति भावः ॥

शास्त्रस्य प्रामाण्यमिति । (कै)

एवं च पूजार्थमित्यस्य स्वशास्त्रपूजार्थमित्यर्थ इति भावः ॥ तदेवाह

शास्त्रस्य हीति ॥ (कै)

भाष्ये

देशग्रहणं चेति । (भा)

चेनाचार्य्यग्रहणम् । देशग्रहणस्य पूजार्थत्वन्तु वक्तुमशक्यं देशस्य स्मर्त्तृत्वाद्यभावादिति भावः ॥

स्थिरं भवतीति । (कै)

ततश्च देवकीर्त्तौ तद्देशीयानां स्थिरवस्थानमित्यर्थः । तेन च पाणिनेरपि तदिति भावः ॥ ननु नित्यशब्दवादे गालवादिग्रहणस्य पूजार्थत्वे इक्षाभावविशिष्टस्य साधुत्वबोधनं न स्यात् तत्पक्षे सक्तुघूपायेन साध्वसाधुविवेकाय शास्त्रमिति चेन्न । गालवः स्मर्त्ता नान्य इति स्मृत्यन्तराऽनुसन्धानद्वारेण विकल्पसिद्धेः । वा ग्रहण एव कर्त्तव्ये गालवग्रहणं व्यर्थमिति शङ्कानिरासार्थं तु भाष्ये "पूजार्थम्" इत्युक्तम् ॥ भाष्ये

तत्कीर्त्तने चेति । (भा)

आचार्य्यदेशकीर्त्तने चेत्यर्थः । यस्य कार्य्यांशब्दास्तस्येति शेषः । तदेवाह

इदानीमिति ॥ (कै)

प्रयुक्तमिति । (कै)

कृतमित्यर्थः ॥

नित्यपक्षे त्विति । (कै)

कार्य्यपक्षे त्वेवं वक्तुमशक्यं यतो गालवेन कृतोऽतः कर्त्तव्यो नान्येन कृतोऽतो न कर्त्तव्य इति । अन्येन कृतस्य पुनः करणवैयर्थ्यात् । न ह्यन्यकृतस्य पुनः करणमस्ति । नाप्यन्येनाकृतस्याकरणम् । तादृशस्यैव करणात् । एतेनान्येन कृतस्यानुवादोऽन्याकृतत्वबोधनद्वारा विकल्पबोधक इति परास्तम् । पाणिनिकृतानामपि [१]"पचो व" इत्यादीनामन्याकृतत्वेन तेषामपि विकल्पा-

१ अ ८। पा २। सू ५२॥

पत्तेश्च तस्मात् कार्य्यवादोऽसङ्गत इति दिक् ॥ ननु लोकतोऽनित्यत्वार्थलाभेऽपि निषेधविकल्पयोरलाभ इत्यत आह भाष्ये

आचार्य्यः खल्वपीति । (भा)

एवं च [1]"हृक्रोरि"त्याद्युभयत्र विभाषायां यथा तव तयोर्लाभस्तथा विभाषापदघटितेऽपि भविष्यतीति नार्थः सूत्रेणेति भावः ॥

वाशब्दो विकल्पे इति । (कै)

यत्तु अर्थस्य संज्ञित्ववद्विभाषापदार्थस्यैव संज्ञात्वम् । तत्रापीतेः सम्बन्धात् । न च पदजन्यपदार्थोपस्थित्यभावेनान्वयासम्भवः । विकल्पवाचिपदस्य तदर्थे लक्षणाभ्युपगमात् । एवं च लक्षणा तात्पर्य्यग्राहकमिदं सूत्रम् । अर्थे न संज्ञात्वमिति चेत्तदर्थाच्छिन्नशब्दमात्रस्य संज्ञात्वमस्तु इतिशब्दसम्बन्धसामर्थ्यादिति । तन्न । एकस्याऽनेकसंज्ञायाः शास्त्रेऽदर्शनात् । "अनाकृतिः संज्ञा" इति वृद्धिसूत्रस्य भाष्यविरोधाच्च ॥

तेनाकृतीति । (कै)

तत्पदे लिट्त्वजातौ विधिमुखेन प्रवृत्तौ पित्येव स्याद् निषेधमुखेन प्रवृत्तौ कित्येव स्याद् न तु सर्वत्रेति सूत्रं कर्त्तव्यं सति च सूत्रे लिट्त्वजातौ प्राप्तस्य निषेधे तस्यामेव विकल्पो विधीयमानस्सर्वत्र सिध्यतीति भावः ॥ प्रत्याख्यानाशयमाह

व्यक्तिपक्षे त्विति । (कै)

क्वचिद्विधिमुखेनेत्यन्वयः ॥

---

१ अ १ । पा ४ । सू ५३ ॥

किं चिल्लक्षणम्। (के)

उभयत्र विभाषारूपम्। उत्तरत्र तु क्वचित् प्रतिषेधमुखेनेत्येव पाठः॥ परे तु आकृतिपक्षे किं तज्जात्याश्रयसकलव्यक्तिविषयं लक्षणम्। उत तज्जात्याश्रययत्किञ्चिद्विषयम्। नाद्यः। सूत्रारम्भेऽपि नपदघटितवाक्यस्य तद्विषयतायां वक्तुमशक्यत्वात्। तस्य यत्किञ्चिद्विषयता वाघटितस्य सर्वविषयतेति तु दुर्लभम्। नान्त्योऽपि। "न ब्राह्मणं हन्याद्" इत्यादौ जातितत्वे सर्वविषयतायाः एव दृष्टत्वात्। किं च। तत्र विधिमुखप्रवृत्त्या पिद्विषयत्वं निषेधमुखप्रवृत्त्या किद्विषयत्वं वा इत्यत्र विनिगमनाविरहात् सूत्रं विनाप्युभयमुखेन प्रवृत्तावनिष्टसिद्धेः। न च भावतात्पर्य्यकता पिद्विषयत्वे विनिगमिका। "विभाषोपयमने" इत्यादौ चिसंज्ञयताऽनुपपत्तेः। भावतात्पर्य्यकतालोभेनाप्राप्तविभाषात्वस्यैव सम्भवात्। विप्रतिषेधशास्त्रबलात् तेष्वभावतात्पर्य्यकतापि स्यादिति चेत् प्रकृतेऽपि तुल्यम्। तस्मात् पक्षद्वयेऽपि सूत्रप्रत्याख्याने भाष्यतात्पर्य्यम्। किं च सूत्रे कृते चिसंज्ञयाऽप्राप्तविभाषास्वपि तत्प्रवृत्तिः स्यादिति सोच्छिद्येतैव। लक्ष्यानुसाराद्प्रवृत्तौ तु सूत्रं व्यर्थमेवेति भाष्याशयः। एतदेव ध्वनयन् चिसंज्ञयाप्राप्तविभाषां दर्शयति। चिसंज्ञयास्वप्राप्तविभाषात्वमेवेतिभ्रमनिरासायेतरयोरपि कथनमित्याहुः॥ "इत उत्तरम्" इत्यस्य लाभे युक्तिमाह

अधिकार इति॥ (के)

संज्ञयत्वयस्य क्वाप्यभावादाह

चिष्ठिति ॥ (कै)

[1]"द्वन्द्वे च" [2]"विभाषा जसि" इत्युक्तोभयशब्दोदाहरणममङ्गतमत आह

उपलक्षणेति । (कै)

"विभाषा जसि" इत्यस्य द्वन्द्वविषयतया "द्वन्द्वे च" संज्ञानिषेधेन सर्वनामसंज्ञो या प्राप्तविभाषात्वनिश्चयेन निषेधीयप्राप्तविभाषात्वनिश्चयेन वा चिसंज्ञयत्वाभावादिति भावः । द्वन्द्व इत्यस्यासम्बन्धे पूर्वादीनां जसि विकल्पाऽऽरम्भो व्यर्थः स्यादिति तात्पर्यम् ॥ ननु तयशब्देऽपि कथं संज्ञयः प्रथमादिसूत्रेण प्रत्ययमात्रस्य संज्ञा सर्वादिसूत्रेण तु उभयशब्दस्य समुदायस्येति भिन्नविषयत्वेनाऽप्राप्तविभाषात्वनिर्णयादत आह

तत्रेति ॥ (कै)

"तयशब्देन" इत्यस्य तदन्तविधिरित्यनेनान्वयः ॥ अन्वर्थत्वेन कथं तदन्तविधिरत आह

केवलस्येति ॥ (कै)

सर्वनामत्वसम्भवात् । (कै)

सर्वार्थबोधकत्वसम्भवात् । तथाच तस्य सर्वार्थबोधकत्वासम्भवात् सामर्थ्येन संज्ञाविधावपि प्रत्ययग्रहणपरिभाषया तदन्तविधिरिति भावः ॥

---

१ अ १ । पा १ । सू ३२ ॥ २ अ १ । पा १ । सू ३३ ॥

पूर्वविप्रतिषेधश्चेति। (कै)

सर्वादिलनिबन्धना संज्ञा जस्भिन्ने सावकाशा द्वितीयादिषु च विकल्प उभयशब्दे जस्युभयप्राप्तौ पूर्वविप्रतिषेधः। न च नित्या संज्ञाऽन्तरङ्गा। [१]अन्तरङ्गपरिभाषाया अप्रवृत्तेः। तथाहि। "नान्तरङ्गं बलीय" इत्यस्या अत्र विषयः। युगपत्प्राप्त्यभावात्। जसादेस्सर्वनाम्नो विहितत्वसम्पत्तये तस्याः पूर्वमेव प्रवृत्तिरस्यास्तु जस्त्यत्यनन्तरमिति स्पष्टमेव। ना"ऽसिद्धं बहिरङ्गमन्तरङ्गे" इत्यस्याः। अन्तरङ्गोत्तरं बहिरङ्गप्राप्तेरनया तत्प्रवृत्तेर्वारयितुमशक्यत्वात्। बहुशस्तथा सत्त्वात्। तदुत्तरमपि एतत् प्रवृत्त्या पक्षे तदभावविशिष्टस्य साधुत्वबोधनम्। पूर्वादिष्विव चिसंज्ञायत्वस्य भाष्योक्तस्याऽसङ्गत्यापत्तेश्चेति दिक्॥ भाष्ये

तेन वेत्यादि। (भा)

तेन नित्ये प्राप्ते वा अन्यत्राप्राप्ते वेत्यन्वयः॥

प्रत्ययान्तरेति। (कै)

एवं चोभयशब्देऽस्याप्राप्तेरप्राप्तविभाषात्वमेवेति भावः॥

न विशेषित इति। (कै)

न प्रत्याहारघटक इतरव्यावर्त्तकः। समुदायानुबन्धस्यावयवानुबन्धत्वाभावादिति भावः॥

प्रमाणे इति। (कै)

सदृशस्यैव तत्सन्निवेशे सत्त्वादिति भावः॥ भाष्ये

---

१ असिद्धं बहिरङ्गमन्तरङ्गे। परिभाषेन्दुशे – ५० ॥

ऊर्णोतेर्विभाषेति। (भा)

ऊर्णोधातोः कित्त्वविषये विभाषेत्यर्थः॥

वाक्यभेदेन (कै)

दृत्यस्य विकल्प्यत दृत्यनेनान्वयः। इदं सर्वं ङित्त्वकित्त्वयोरैक्याभिमानेन॥ किमर्थं तर्हि पुरस्तात्कृतमत आह

इडुपेति॥ (कै)

गङ्गते भाष्ये

अन्यङ्गीति॥ (भा)

तङ्गाख्या

भेद इति। (कै)

तथाच त्रिसंग्रयत्वानुपपत्तिरिति भावः॥

गुणनिषेधस्येति। (कै)

यद्यपि ङित्कित्कार्य्याणि भिन्नानि बहूनि सन्ति तथाप्यूर्णोतावन्याऽसम्भव इति भावः॥

इत्यचेति। (कै)

इत्यचैवेत्यर्थः॥

वाक्यभेदेनेति। (कै)

पृथक् पाठसामर्थ्यादिति भावः॥

परविप्रतिषेधे त्विति। (कै)

१"विज इट्" इत्यतोऽर्थाधिकाराद्चेडागम एव गङ्गत इति

पक्षे क्त्यपि बोध्यम्। [१]"यमो गन्धने" [२]"विभाषोपयमने" इत्येते सिचः कित्त्वविधायके ॥

यदेति। (कै)

गन्धनं सूचनम्। उपयमनं स्वीकारः। गन्धनाङ्गमिति बहुव्रीहिः। तत्र गन्धनपूर्वके स्वीकरणे यदि कित्त्वविकल्पः। ततः प्राप्तविभाषेत्यर्थः। परभूतासु [३]"दीपजन" इति भिन्नासु अप्राप्तविभाषासु पूर्वविषयनिवृत्तिः पूर्वविप्रतिषेधाङ्गीकारस्यापाप्तविभाषाबे बीजमिति बोध्यम्। [४]"वृत्तिसर्ग" इत्यात्मनेपदविधायकम् ॥ ननु मृगादीनाम्प्राणित्वादप्राणिनामिति नित्ये प्राप्ते इत्ययुक्तं मृगादिविषयके एव च चिसंग्रयत्वादत आह

चर्मादीति ॥ (कै)

प्रत्ययान्ता इति। (कै)

प्रत्ययः सनादिरन्तावयवो येषामित्यर्थः। उषादयश्च तदेकदेशा न प्रत्ययान्तरूपा इति भावः ॥

संज्ञा संज्ञिसम्बन्धार्थ इति। (कै)

अत एव क्यजाद्यन्तानां संज्ञासिद्धिरावृत्तौ तु गौरवमिति भावः। केचित्तु प्रत्ययान्तादित्यनुवृत्तौ उषादिभ्यः कर्तृक्विबन्तप्रकृतिकाचारक्विबन्तेभ्य एव स्यादिति प्राप्तविभाषा तन्निवृत्तौ पूर्वविप्रतिषेधेऽप्राप्तविभाषा निवृत्तौ परविप्रतिषेधे उभयचेति भाष्याशयः ॥

---

१ अ १। पा २। सू १५॥ २ अ १। पा २। सू १६॥
३ अ ३। पा १। सू ९१॥ ४ अ । पा ३। सू ३८॥

प्रत्ययान्ता धात्वन्तराणीति । (भा)

अस्यायं भावः । हलन्तेभ्यः आचारक्विपोऽनभिधानमेवेतरप्रत्ययान्तास्तु नोषादय इत्यप्राप्तविभाषात्वमेवेति वदन्ति ॥ "एकपरिहारः" कर्मस्थभावकत्वाऽभावरूपः ॥ ननु कर्त्तरीत्यनुवृत्तिर्व्यर्था कर्मणि भावे कर्मकर्त्तरि च परत्वात् [१]"चिण्भावकर्मणोः" इत्यस्य प्रवृत्तेरिति चेन्न। विप्रतिषेधलभ्यार्थस्यैव स्फुटत्वायाऽनुवृत्त्या प्रदर्शनादितिदिक् ॥

तृन्नादीनामिति । (भा)

[२]आक्रोशे च (पा)

[३]संज्ञायाम् (पा)

[४]विभाषा तृन्नन्नतीक्ष्णशुचिषु (पा)

इति सूत्रे इत्यर्थः ॥

यद्यच्कावितिं । (कै)

[५]अच्कावशक्तौ (पा)

इत्यतस्तदनुवृत्तौ तु निःसन्देहमप्राप्तविभाषेति भावः ॥ एतद्भाष्यविरोधाच्च तच्चाच्कावित्यनुवृत्तिपरा ग्रन्था अयुक्ता एवेति तात्पर्य्यम् ॥

यङ्लुकीति । (कै)

[६]"अचि विभाषा" इत्यत्र "यङि" इति वर्त्तते तत्रोभयोर्यङ्जाद्योरव्यवहितपरत्वासम्भवात् श्रुतस्याचीत्यस्य परविशेषणत्वं

---

१ अ ३ । पा १ । सू ६६ ॥ २ अ ६ । पा २ । सू १५८ ॥
३ अ ६ । पा २ । सू १५६ ॥ ४ अ ६ । पा २ । सू १६१ ॥
५ अ ६ । पा २ । सू १५७ ॥ ६ अ ८ । पा २ । सू २१ ॥

यङीति विषयसप्तमी अचि परे यङ्विषये रेफस्य लत्वमित्यर्थः । तत्र विभाषारम्भसामर्थ्याद् यङ्लुकः पूर्वं [1]"ग्रो यङी"ति न भवति । [2]"न लुमता" इति निषेधानित्यत्वेन पृथगल्लोपेन स्थानिवद्भावेन वा यङ्विषय इति प्राप्तविभाषात्वोपपत्तिः । यङीत्येतन्निवृत्तौ विभाषाया असिद्धत्वादेव [3]नित्यलत्वं समुदायलुक्यपि "न लुमता" इति निषेधान्न तत्प्राप्तिरित्यप्राप्तविभाषात्वोपपत्तिः । उभयत्रविभाषात्वे वियमुपपत्तिः । "ग्रो यङि" इत्येतत्प्रति प्रकरणे प्रकरणमसिद्धमिति विभाषाया असिद्धत्वाभावः । लुकः पूर्वं यङीत्यस्य न प्रवृत्तिः । "अन्तरङ्गानपि" इति न्यायेन लुकस्तत्प्रयोजकाच्प्रत्ययस्य च पूर्वमप्रवृत्तेः । न च लुकि "न लुमता" इति निषेधे यङ्परत्वाभावाद् "ग्रो यङि" इत्यस्याप्राप्तेः कथमुभयत्र विभाषात्वमिति वाच्यम् । दत्तोत्तरत्वादिति दिक् ॥

अथ त्विति । (कै)

तथा च स पक्ष एतद्भाष्यविरुद्ध इति भावः । वस्तुतो द्योतकत्वपक्षेऽपि "व्यतिलुनीते" "गार्ग्यायणी"त्यादौ द्योतकसमुच्चयस्य द्वावित्यादौ द्योतकवाचकसमुच्चयस्य च दृष्टत्वेनाऽत्राप्यात्मनेपद-[4]प्रवृत्तिरस्तीति प्राप्तविभाषा सूपपादेति चिन्त्यमेतत् ॥ भाष्ये

[5]गतिबुद्धीति (पा)

---

१ अ ८। पा २। सू २० ॥ २ अ १। पा १। सू ६३ ॥
३ नित्यं लत्वम् । क । ग ॥ ४ प्राप्तिरस्तीति । क । ग । इ ॥
५ अ १। पा ४। सू ५२ ॥

(नवेति विभाषा । २। २। ४४।) (अ. २। पा. २। आ. ६)

नित्ये प्राप्ते इति । (भा)

नियमशास्त्राणां विधिमुखेन प्रवृत्तिरिति भावः ॥

तच्च विपूर्व इति । (कै)

विहरति ग्रामम् इत्यादौ गच्छतीत्यर्थाऽवगमादिति भावः ॥

भाष्ये

अप्राप्ते हरति भारमिति । (भा)

ननु गत्यर्थत्वादस्यापि प्राप्तिरस्त्येवेति चेन्न । प्रापणार्थत्वेऽपि गत्यर्थत्वाभावस्य [१]"न गती"ति सूत्रे वक्ष्यमाणत्वात् ॥

[२]दैवयज्ञीत्यादीति । (कै)

अनार्षयोरित्यनुवृत्त्यादिनाऽत्रापि सन्देहसम्भव इति भावः । आदिना [३]"विभाषा पुरुषे" इति ॥

इति शिवभट्टसुतसतीगर्भजनागोजिभट्टकृते
महाभाष्यप्रदीपोद्योते प्रथमाध्यायस्य
प्रथमे पादे षष्ठमाह्निकम् ॥

---

१ अ १ । पा ३ । सू १५ ॥ २ अ ४ । पा १ । सू ८१ ॥
३ अ ६ । पा ३ । सू १०६ ॥

महाभाष्यप्रदीपोद्योतः ।

इग्यणः सम्प्रसारणम् । १ । १ । ४५ ॥



लिङ्गेति । (कै)

प्रदेशेषु प्रथमानिर्देशो वाक्यसंज्ञाया अन्यविभक्तिनिर्देशश्च वर्णसंज्ञाया लिङ्गमिति भावः ॥ ननु तर्हि लिङ्गादुभयोरपि संज्ञित्वमस्त्वित्यत आह

[१] युगपच्चेति । (कै)

अनेकस्यार्थस्यैकशब्देन युगपदनुपस्थितेरिति भावः ॥ ननु वाक्यस्य संज्ञायां प्रदेशेषु तस्यैव विधानं स्यादत आह

वाक्यार्थ इति । (कै)

पूर्वसूत्रादितीत्यनुवर्त्त्य "इग्यण" इति सम्प्रसारणसंज्ञमित्यर्थादिति भावः ॥ स्वं रूपमित्युक्तेः शास्त्रे शब्दपरत्वस्यौत्सर्गिकत्वेनेतिसमभिहारं विनार्थपरत्वाऽसम्भवादिति बोध्यम् ॥ ननु यणस्थानिकत्वोपलक्षित इगेव वाक्यार्थ इति वर्णपक्षादस्य को भेद इत्यत आह

---

१ पक्षद्वयस्यापि लिङ्गदर्शनाद्युगपच्चोभयोः संज्ञित्वस्यैकस्मिन् वाक्येऽनुपादानादेकतरपक्षाऽऽश्रयणे सर्वकार्य्यासिद्धिप्रसङ्गात् प्रश्नः (भाष्ये) किमियमिति ॥

भवतीति । (कै)

एवं चेग्भवनं वाक्यार्थ इति भावः ॥

तत्प्रतिपादितमिति । (कै)

संज्ञयोपस्थितस्यानर्थकत्वे तदर्थानुपयोगे वा संज्ञोपस्थितस्वरूपस्यैवोपादानम् । नचैतदुभयमप्यचेति भावः ॥

प्रतिपादयतीति । (कै)

[१]"ष्वङः सम्प्रसारणम्" इत्यादौ । "उच्चारितस्यैव प्रत्यायकत्वम्" इति [२]"अणुदित्" इति सूत्रस्थभाष्यविरुद्धमिदम् ॥ [३]"वर्णविधिरि"त्यस्य वर्णविषयविधानमित्यर्थोऽसिद्धेरभावादाह

वर्णाश्रय इति । (कै)

सम्बन्धसामान्यषष्ठ्या समासो विधिरिति "कर्मणि किरि"ति भावः ॥ आदिना एकादेशः ॥

वाक्यार्थेनेति ।

क्रियारूपेणेत्यर्थः ॥ [४]"नाप्येतयोरि"ति भाष्यं व्याचष्टे

तस्य चेति । (कै)

चोऽसम्भवादित्युत्तरं योज्यः ॥ भाष्ये

एतयोः कार्य्ययोरिति । (भा)

पूर्वरूपदीर्घयोरित्यर्थः ॥ स एव तावन्नास्तीति वक्तव्ये दुर्लभत्वोक्तिरनुचितेत्यत आह

---

१ अ ६ । पा १ । सू १३ ॥ २ अ १ । पा १ । सू ६९ ॥
३ सम्प्रसारणसंज्ञायां वाक्यस्य संज्ञाचेद् वर्णविधिर्न सिध्यति । भा ॥
४ नाप्येतयोः कार्य्ययोः सम्भवोऽस्ति । भा ॥

कार्य्यपक्षे इति । (कै)

अनेन भाष्येणातीतानागतयोरविद्यमानयोरप्रत्यासत्या शक्तिग्रहदौर्लभ्यमुक्तम् । निरूपितं चेदं मञ्जूषायां नामार्थवादे ॥

नित्यपक्षे त्विति । (कै)

अनेन [१]"अथापि कथंचिद्" इत्यपि भाष्यं व्याख्यातम् ॥

शास्त्रेति । (कै)

सितमित्यादौ यणस्थानिकत्वाभावेन शास्त्रमात्रैकगम्यं तदित्यर्थः । शास्त्रगम्यत्वे चेतरेतराश्रयमेवेति भावः ॥ भाष्ये

केनासाविति । (भा)

केन मानेन यणः स्थाने इति ज्ञातः स्यात् ॥

अनेन । (भा)

सम्प्रसारणसंज्ञाविधायकेन शास्त्रेणासाविग् यणःस्थाने स्थाप्यत इत्यर्थः ॥ उभयोः संज्ञात्वमित्यर्थोऽसंभवी एकस्यैव संज्ञात्वादत आह

[२]उभयोः संज्ञेति । (कै)

---

१ अथापि कथं चिल्लभ्येत केनासौ यणः स्थाने स्यात् । भा ॥

२ विभक्तिविशेषनिर्देशस्तु ज्ञापक* उभयसंज्ञात्वस्य । (वा) । उभयोः संज्ञा (षष्ठीतत्पुरुषः) उभयसंज्ञा । तस्या भाव उभयसंज्ञात्वम् । तच्च तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयेणोभयोः संज्ञा सिध्यति । भर्तृहरिस्त्वाह –

---

* "ज्ञापकमुभयसंज्ञात्वस्य" इति पाठोऽप्यस्ति भाष्ये ॥

एकशेषश्च प्रतिपदमनेकमर्थमुद्दिश्यैकस्याः संज्ञाया एकवाक्यतयैव विधातुं शक्यत्वादचाऽऽवृत्तेः क उपयोग इति चिन्त्यम् ॥ भाष्ये

यथा काकादिति । (भा)

अज्ञात एव काकत्वे तज्ज्ञातत्वमात्रेण तथा व्यवहारवदचापीत्यर्थः ॥ तत्र शङ्कते

नन्विति ॥ (कै)

"[१]अन्यत्र" । "[२]एको गोत्रे" इत्यत्र ॥

यदाऽनुपेति । (कै)

सम्प्रसारणसंज्ञायां लिङ्गाभ्यां वर्णवाक्ययोः ।
प्रविभागस्तथा सूत्र एकस्मिन्नेव जायते ॥
तथा द्विर्वचनेऽचीति तन्त्रोपायादिलक्षणः ।
एकशेषेण निर्देशो भाष्य एव समर्थितः ॥

तन्त्रं च शब्दतन्त्रम् अर्थतन्त्रं वेति मतभेदेन व्यवस्था बोद्धव्या । अर्थभेदाच्छब्दभेदे आद्यः पक्षः । शब्दैक्ये द्वितीयः । आद्येऽपि व्यञ्जकध्वनिमात्रभेदे व्यङ्ग्यैक्ये आवृत्तिरेवेत्यादि बोध्यम् । एवं च

तन्त्रत्वमेकरूप्येण भवेत्तुल्योपकारतः ।
उपकारान्यथात्वे तु भवेदावृत्तिलक्षणम् ॥

इति मीमांसकमर्यादानुरोधो वैयाकरणैर्नकर्त्तव्यः । तस्य भाष्यादिसकलवैयाकरणग्रन्थविरुद्धत्वात् । मूलयुक्तिशून्यतयादुरुपपादत्वाच ॥

१ अन्यत्र चोक्तम् । तदेतत् — "येनैव हेतुनैकः काकस्तेनैव हेतुना द्वितीयश्च तृतीयश्च काको भविष्यति" । ४ । १ । ९३ ॥

२ अ ४ । पा १ । सू ९३ ॥

न उपजातो जात्यभिव्यञ्जकः संस्थानविशेष आकारविशेषो यस्येत्यर्थः॥ कथन्तर्हि तथा व्यवहार इत्याह

निर्ज्ञातमिति। (कै)

एवं च तस्माज्ज्ञातत्वेनाऽवगते तच्छब्दप्रयोग उभयत्रापीति दृष्टान्तत्वोपपत्तिः। अन्ये तु काकाज्ज्ञातो यथा काकत्वाभिसम्बन्धात्काक एवं सम्प्रसारणाज्ज्ञातोऽपि सम्प्रसारणत्वारोपात् सम्प्रसारणमिति भाष्यार्थमाहुः॥

वाक्येष्विति। (भा)

स्वार्थबोधनाय वाक्येषु प्रयोक्तव्येष्वित्यर्थः॥ योग्यक्रिया दर्शनादिरपीत्यत आह

प्रकरणेति। (कै)

तत्तद्वाक्यस्य वाक्यार्थे शक्तिग्रहकाले तत्तदेकदेशस्यापि तत्तद्वाक्यार्थे शक्तिग्रहः पदैकदेशस्य पदार्थ इवेति शक्त्यैव बोधः। पूर्वपरिग्रहे सम्प्रसारणपदस्य तज्जन्यवर्णे उपचारात् प्रयोगः॥ अत्र त्वेकदेशेनैव शक्त्या तदर्थप्रतिपत्तिरिति भेदस्तदाह

आक्षेप्स्यतीति। (कै)

आक्षेपोऽत्र बोधनमेव॥ भाष्ये

इत्येतस्य वाक्यस्यार्थे इति। (भा)

अत्र वाक्यपदं पदसमुदायपरम्॥ "इत्येतस्य" इत्येतदर्थकस्य सम्प्रसारणादुत्पन्नो यस्मादिति सम्प्रसारणस्य यत्कार्यं तस्येति च वाक्यस्यार्थे इत्यर्थः॥ पूर्वेभ्यः पञ्चेभ्योऽस्य भेदमाह

यथा ब्राह्मणेति । (कै)

एवं च यथा तत्र संख्याऽन्वयसंख्येयद्वारा तथा प्रकृते स्वनिर्वृत्तद्वारेति भावः ॥ तदेवाह

तत्फलस्येति । (कै)

यथा पित्तनाम्ना संकल्पितं द्रव्यं तस्याऽयोग्यत्वे तत्पुंचाय समर्प्यते तद्वदिति भावः ॥ भाष्ये

एकत्वेनेति । (भा)

साजात्यादेकत्वेन विशिष्टानि बुद्ध्या कृत्वेत्यर्थः । सर्वेषामेकत्वेनैकजातीयत्वेनैकपरिहारेण सर्वाणि परिहृतानीति भावः ॥

नेदं तुल्यमिति । (भा)

नित्यशब्दवादेऽपि यण्स्थानिकत्वस्य शास्त्रैकसमधिगम्यत्वादिति भावः ॥

भाविसंज्ञेति । (कै)

सम्प्रसारणादिपदस्य तत्त्वेन व्यवहरिष्यमाणे लक्षणेति भावः । अयं समाधिर्वृद्ध्यादिविषयेऽपि बोध्यः ॥

बुद्धीति । (कै)

तदयं सूत्रार्थः । यणः प्रयोगे प्राप्ते दृक्प्रयुज्यमानः सम्प्रसारणसंज्ञ इति । तज्ज्ञानं च यजाद्युपदेशज्ञानमाक्षेप "[1]वचिस्वपि" इत्येतज्ज्ञानं विनापि जातमिति नान्योऽन्याश्रय इत्यर्थः । "वचिस्वपि" इत्यादेश्चायमर्थः । एतत्सम्बन्धियण् प्रयोगे प्राप्ते दृक्प्रयुज्य-

---

१ अ ६ । पा १ । सू १५ ॥

मानः साधुरितीति भावः। असाधोः साधुत्वं ब्रह्मणाप्युपपादयितुमशक्यमत आह

प्रागिति। (कै)

एतदेव ध्वनयितुमभिमतस्येत्युक्तम्॥ ननु दुहेर्लडि उत्तमपुरुषे लस्येटि तस्य सम्प्रसारणत्वेऽदुहितरामित्यादौ "[1]हल" इति दीर्घः स्यादत आह

यथासंख्येति। (कै)

एवं हि यथासंख्यार्थं लकारोपदेशस्यावश्यकत्वे "लकारोपदेशः किमर्थ इति" [2]"लशक्वतद्धिते" सूत्रस्थभाष्यासङ्गतिरिति चिन्त्यमिदम्। तस्मात् सम्प्रसारणस्येत्यादौ तद्भावितपरत्वाश्रयणान्न दोषः। ध्वनितं चेदं वाक्यसंज्ञापक्षस्यापने वाक्यैकदेशन्यायं वदता भगवता। एतेन द्युभ्यामक्षद्युवावित्यपि सिद्धम्॥

अचः पश्चादिति। (कै)

समानाङ्गग्रहणस्य करिष्यमाणत्वादौकारस्य चानङ्गस्यत्वादित्यर्थः॥ तत्प्रत्याख्यानेऽप्याह

वार्णेति। (कै)

आङ्गमुवङ्॥

---

१ अ ६। पा ४। सू २॥
२ प्रत्याहारसूत्रम् – २॥

आद्यन्तौ टकितौ । १। १। ४६॥

[1]अपि त्विति । (कै)

एतदर्थमेव स्थानाख्यप्रमाणेन सिद्धेऽपि [2]"यथा संख्य"सूत्रमावश्यकमिति भावः ॥ "अभिन्नस्य" । अपृथग्भूतस्य ॥

सुतरामिति । (कै)

यत्र न साहित्यस्य नियमेन प्रतीतिः पृथगुपस्थितिश्च तत्रापि चेन्न क्रमव्यवस्था किमु वक्तव्यं साहित्यप्रतीतावपृथगुपस्थितौ चेत्यर्थः । तथान्वयबोधे तत्तत्पदार्थानां सर्वसाधारणव्यासज्यवृत्तिधर्मावच्छिन्नत्वेनोपस्थितिस्तन्त्रमिति तात्पर्यम् ॥

अन्तो निश्चय इति । (कै)

दर्शनस्यावसानं निश्चये सत्याकाङ्क्षाऽभावाद्भवतीति दृष्टान्तशब्देन निश्चय उच्यते इत्यर्थः ॥

एतद्दर्शनमिति । (कै)

निश्चय इत्यर्थः । एवं च यथासंख्यान्वयाभिप्रायेणेदृशप्रयोगो लोके ऽसाधुरिति भावः ॥ भाष्ये

---

१ लोकव्यवहारादत्र क्रमव्यवस्था न सिध्यति अपि तु शास्त्रेणैवेति—प्रदर्शनाय भाष्ये "समासनिर्देशोऽयमिति" ॥

२ अ १। पा ३। सू १०॥

[१] **अस्ति वेति** (भा)

प्रश्नः । चपाठस्त्वयुक्तस्तस्य प्रश्नेऽयुक्तत्वात् ॥ भाष्ये

कौ पुनरिति । (भा)

यौ टकितौ आद्यन्तौ तौ किमागमावुताऽऽदेशाविति प्रश्नः ॥

आगमावित्याहेति । (भा)

आद्यन्तपदसत्त्वादिति भावः ॥

नित्येष्विति । (भा)

वर्णास्तद्वटिताः प्रयोगेषु श्रूयमाणाः शब्दाश्च व्याकरणकार्य्या आकाशवन्नित्या इतिमते इदम् ॥

तच्च शब्दान्तरादिति । (भा)

प्रसक्तां शब्दान्तरबुद्धिं विहायेत्यर्थः ॥ "[२]अनागमकानाम्" इत्यादेर्यद्यपि घुसंज्ञासूत्र आश्रय उक्त एव तथापि तं विस्मृत्य तत्कथमिति प्रश्ने एकदेशी साहचर्य्यादस्य संज्ञासूत्रत्वेन तदुपपत्तिमाह

संज्ञाधिकारोऽयमिति ॥ (भा)

तच्च शङ्कते

---

१ किल्पुरणमुद्रापितभाष्यपुस्तके "अस्ति चेति" इति पाठोऽस्ति ॥

२ "गुङ्कं पुनर्यद्" इत्यारभ्य "अनागमकानां सागमकाः । तत्कथम्

सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः ।
एकदेशविकारे हि नित्यत्वं नोपपद्यते ॥"

इत्याद्यन्तमुक्तम् भगवता घुसंज्ञासूत्र (१ । १ । २०) व्याख्यानावसरे ॥

यद्येवमिति ॥ (कै)

उपलक्ष्यत इति। (कै)

एवं चानयोरित्त्वमेव नेति भावः ॥

[१]आटजिति। (कै)

यद्यपि प्रत्ययविधौ नास्य प्रवृत्तिः षष्ठीत्यपकर्षणात्। अत एव "टाटिटन्" "[२]ऐकागारिकड्" इत्यादौ नास्य प्रवृत्तिः। तथापि टुकः पर्य्यायेणाद्यन्तता स्यादिति दोष इति बोध्यम्। "[३]आटश्च" इत्यादिभिस्तु टकारार्थादित्वोपलक्षिताकाराद्यनुवादेन वृद्ध्यादिविधानम् ॥ भाष्ये

संकीर्त्त्येते। (भा)

प्रथमत उच्चार्य्येते ॥

उदाह्रियेते। (भा)

पश्चादुच्चार्य्येते इत्यर्थः ॥

अन्तरतम इति। (कै)

अर्थतः श्रुतितश्चेति भावः ॥ ननु प्रथमातिक्रमे कारणाभावादाद्युदात्तत्वेनेष्टसिद्धिरत आह

तच्चेति ॥ (कै)

भाष्ये

---

१ अ ५। पा २। सू १२५ ॥
२ अ ५। पा १। सू ११३ ॥
३ अ ६। पा १। सू ९० ॥

तच्च वाक्य एवेति। (भा)

त्रिपदे वाक्य एवेत्यर्थः॥ "[1]एवः" प्रसिद्धौ॥ एवं च तत् समानार्थकवृत्तावप्यकारविशेषणत्वं सुलभमिति भावः॥

प्रत्याख्यानादिति। (कै)

यासुड् विधायकं च "यासुडुदात्तः परस्मैपदेषु" इति पाठ्यमिति न दोषः॥ "[2]आडजादीनाम्" इति कुर्वतः सूत्रकृतो नायं पक्षस्तात्पर्य्यविषयीभूत इत्यतो घुसंज्ञासूत्रोपपादितमेव पक्षं सिद्धान्त्याह भाष्ये

अथवेति॥ (भा)

परिभाषापक्षेऽपीति। (कै)

परिभाषात्वेनाऽऽगमत्वपक्षेऽपीत्यर्थः॥ भाष्ये

तेनाऽयं विशेषेणेति। (भा)

"ततः पञ्चादिकारम्" इत्यन्तेनेत्यर्थः। शब्दान्तरं तव्याद्यपेक्षया भिन्नसमुदायम् इतव्यादिरूपमित्यर्थः॥

प्रतिपद्यते (भा)

तव्यबुद्धिनिवर्त्तनेनेत्यर्थः॥

नित्यं पदमिति। (कै)

व्याकरणानिष्पाद्यमित्यर्थः॥

अन्वाख्यायत इति। (कै)

क्रमेण सिद्धतत्तद्वयवप्रतिपादनेन पूर्वपूर्वनिरवयवकबुद्धि-

---

१ "एव" प्रसिद्धौ। इ॥ २ अ ६। पा ४। सू ७२॥

विपरिणामद्वारा प्रत्याय्यते इत्यादेशस्यैव द्रव्यत्वेऽपि बुद्धि-विपरिणामान्न नित्यत्वहानिः॥ तदेव दर्शयति

न तत्र कङ्कटा इति। (कै)

कङ्कटः सन्नाह उपरितनशुष्कत्वचः॥ भाष्ये

[१]खदिरबर्बुरयोरिति (भा)

सामान्यमुपदिशतीत्यध्याहृतसामान्यापेक्षया षष्ठी॥ सामान्यमेव दर्शयति

खदिरबर्बुरौ गौरकाण्डाविति। (भा)

द्रव्यान्तरं कङ्कटाद्विन्नं तदवयवकं समुदायमिति पतञ्जलिमते गुणसमुदायस्यैव द्रव्यत्वादिति भावः। तत्र यथा गौरकाण्डत्वादिना खदिरेऽपि प्रसक्तां बर्बुरबुद्धिं कङ्कटवानित्यनेन निवर्त्य खदिरबुद्धिः स्थाप्यते तथेहापि सामान्योपदेशात् सर्वत्र तव्यबुद्धौ प्रसक्तायाम् इड्बोधकविशेषेणागमित्वबोधनद्वारैव इतव्यबुद्धिः स्थाप्यते इत्यर्थः। निरूपितं चैतद् घुसंज्ञासूत्रे। अत्र पक्षे वाचकस्यैवानया प्रणाल्या व्युत्पादनम्। उत्तरपक्षे तु कल्पितस्यानेन साक्षाद्बोधनं तेन च बोधकस्याखण्डस्य बोधनमिति भेदः॥

रूपार्थान्वयाभावादिति। (कै)

व्याकरणेन यस्य असितिरूपस्यार्थो दर्शितस्तेन रूपेण तस्यार्थस्य प्रयोगेऽन्वयाभावः स्त एधीत्यादौ व्यभिचारादित्यर्थः॥

---

१ खदिरबुर्बुरयोरिति। इ। "बुर्बुर" इति पाठः किल्हहरणमुद्रापित-भाष्यपुस्तकेऽप्यस्ति॥

असत्येति। (कै)

शास्त्रप्रक्रियाकल्पिता असत्या इत्यर्थः। यद्यपि सत्यगवयो रेखागवयवत्सावयव एव। अत्र कल्पिताऽवयवसदृशाऽनवयवानां तत्रान्वयात् तथापि सत्यम्पदमखण्डमेव। एधौत्यादौ शास्त्रकृत्-कल्पिताऽवयवसदृशानामनुपलम्भादित्येतत्पक्षनिष्कर्षः॥

सत्यस्य पदस्येति। (कै)

एवं च रेखागवयवत्कल्पिताऽनित्यपदविषयकं शास्त्रं तत्रागमेऽपि न क्षतिर्न च तल्लोके प्रयुज्यमानं किन्तु तत्प्रत्याय्यमेव पदं तथेति भावः॥ "एतया" इत्यादि भाष्यस्यायमर्थः। "एतया" वक्ष्यमाणया-"ऽऽनुपूर्व्या अयं" पाणिनिः "शब्दान्तरं" बोधकशब्दापेक्षया भिन्नं रेखागवयस्थानीयम् "उपदिशति" प्रतिपादयति। तत्राऽऽगमबुद्धावपि न शब्दनित्यताहानिरिति॥ ननु टकितोराद्यन्तविधाने कस्यापि प्रत्ययस्याऽप्राप्तेः कस्य प्रतिषेधो वक्तव्य इत्यत आह

प्रत्ययपरत्वस्यापीति। (कै)

अपिना स्थानेयोगत्वस्य॥ भाष्ये

युक्तं तत्रेति। (भा)

नुमश्रमादीनां मित्त्वमनवकाशम्॥

उभयम्। (भा)

प्रत्ययसम्बन्धि टित्त्वं कित्त्वं च। एवं चागमटित्त्वकित्त्वयोरनवकाशत्वात् प्रत्ययसम्बन्धिनश्च सावकाशत्वा"द्येन नाप्राप्तन्यायेने"दं स्थानेयोगत्वस्यैवाऽपवाद इति भावः॥

(आद्यन्तौ टकितौ। १। १। ४६।) (अ. १। पा. १। आ. ७)

सति परत्वे इति। (कै)

टिदन्तान् ङीब्विधानात् किति परे आलोपविधानाच्चेति भावः॥ टित्परो भवतीति वचनाऽभावादाह

ङीबर्थादिति। (कै)

यद्यप्युभयथा टित्त्वस्य सावकाशत्वे परत्वात् "परश्च" इत्यस्य प्रवृत्त्या पर एव भविष्यति तथापि "मिदचोऽन्त्यात्" इति साहचर्य्यादाद्यसामान्यचिन्तामेव न्याय्यां मन्यते॥ अभ्युपगम्याऽपि "परश्च" इत्यस्य परत्वात् प्रवृत्तिमाह

टितः खल्वपीति। (भा)

एष परिहारो युक्तं "तत्र" इत्यादिनोक्तदिशो यथा कथंचिद्भवेदपीत्यर्थः। तत्राऽसंभवरूपविरोध सद्भावात्। किति तु तदभावात् समावेशः स्यादिति भावः॥ तत्र दोषमाह

[१]नोङित्यादि॥ (भा)

अवयवत्वेति। (भा)

अन्तशब्दोऽवयववाचीति भावः॥

पूर्वोक्तम्। (कै)

"[२]कुतो नु खलु" इत्यादिनोक्तम्॥

अधिकम्। (कै)

---

१ अ ६। पा १। सू १७५॥

२ "कुतो नु खल्वेतत् टित्करणादयं परो भविष्यति" इत्यादिनाचैवोक्तं भाष्ये॥

ङीपोऽनवकाशत्वपूर्वपक्षसमाधानम् ॥ भाष्ये

स्यादेव हीति । (भा)

बाध्यसामान्यचिन्तामेव न्याय्यां मन्यते ॥

परत्वादिति । (कै)

ग्रब्दपरविप्रतिषेधात् । "आद्यन्तावि"ति सूत्रे च किदन्त दित्यस्य परत्वादित्यर्थः ॥ भाष्ये

[1]गापोष्टगिति (भा)

उपलक्षणम् । नदट्चोरडादीनाम् ॥ बाध्यसामान्यचिन्ताश्रयणेऽपि दोषाभावमाह

सिद्धन्विति ॥ (भा)

षष्ठ्यधिकार इति । (भा)

तत्राऽनुवर्त्यैदं व्याख्येयम् । तत्रत्य षष्ठीपदं वाचाऽपकृष्टव्य-मिति भावः ॥

प्राग्रेति । (कै)

एतदुपस्थितेः प्रागिति शेषः ॥

नत्विति । (कै)

प्रत्ययविधौ प्रसक्तस्यानषष्ठ्यभावादित्यर्थः ॥ भाष्ये षष्ठीपदा-ऽसम्बन्धेऽपि समाधानमाह

आद्यन्तयोर्वेति ॥ (भा)

---

१ अ ३ । पा २ । सू ८ ॥

अर्थशब्दःप्रयोजनवाची "षष्ठ्यर्थत्वाद्" इति बहुव्रीहिरित्याह

षष्ठ्याः प्रयोजकाविति । (कै)

षष्ठ्यर्थस्य प्रयोजकावित्यर्थः । षष्ठ्यन्तार्थस्यावयवभूताद्यन्तनिरूपकत्वेन तत्प्रयोजकत्वमेतयोर्बोध्यम् । यद्यचावयवभूताद्यन्तरूपोऽर्थः स्यात् तदा तस्य निरूपकाकाङ्क्षत्वात् स्यादेव षष्ठ्यर्थस्तद्बोधनाय च षष्ठीप्रयोगो न च सोऽस्ति तस्मादाद्यन्ताभावावगतिरिति भावः ॥ भाष्ये

षष्ठ्या अभावे (भा)

इत्यस्य तदर्थाभावे इत्यर्थः । षष्ठीरूपशब्दाभावात्तदर्थाभावस्तदर्थाभावाच्चाऽऽद्यन्ताभाव इत्यर्थं मन्वानस्य शङ्का ॥ भाष्ये

युक्तं पुनरिति । (भा)

"नार्थे"त्यत्र काकुः ॥

शब्दभावेति । (कै)

षष्ठीसत्त्वे तदर्थसत्त्वादाद्यन्तस्थितिः षष्ठ्यभावे तदर्थाऽभावादाद्यन्ताभाव इत्युक्तेरितिभावः ॥ कारकत्वे बाधकमाह

सर्वेण । (कै)

रत्नादि शब्देन ॥

सर्वस्य । (कै)

रत्नादिरूपस्य ॥ भाष्ये समाधत्ते

अर्थनिमित्तक एवेति ॥ (भा)

तद्वाचष्टे

अर्थ एवेति ॥ (कै)

अनुमीयत इति। (कै)

कार्य्याभावेन कारणाभावोऽनुमीयते यथा नदीपूराऽभावेनोपरिदेशे षष्ठ्यभाव इति भावः॥ भाष्ये "आद्यन्तावर्थौ" षष्ठ्यर्थद्वारा षष्ठीप्रयोजकावित्यर्थः॥ एवं कार्य्याभावात् कारणाऽभावानुमाने कारणाऽभावात्कार्य्यमपि नेति नियमयति भाष्ये

तयोरभाव इति ॥ (भा)

ननु प्रत्ययविधावपि क्वचित् षष्ठी दृष्टेत्यत आह

[१] चरेष्ट इत्यादि ॥ (कै)

नत्विति। (कै)

एतत्सूत्रोपस्थानेनेति भावः॥ तत्र हेतुमाह

प्रत्ययेति ॥ (कै)

आकाङ्क्षेति। (कै)

देशांश इत्यर्थः॥

अनर्थित्वात्। (कै)

एतदाकाङ्क्षाभावात्। अत एव धातोः प्रातिपदिकादित्यधिकाराऽनुग्रहो भवति। धात्वादिभ्यः परो गादिभ्योऽनन्तर इत्यर्थात्॥

न कार्य्यकालेति। (कै)

एतत्तत्त्वम् [२]"इको गुणवृद्धी" इत्यत्र निरूपितम्॥ वस्तुत"स्वा-

---

१ अ ३। पा २। सू १६॥ २ अ १। पा १। सू ३॥

श्रित एव परवचनात्सिद्धम्" इत्यस्यैव सिद्धान्युक्तित्वाद् "नापवाद-त्वाद्" इत्यादेः पूर्वपक्ष्येकदेशिसिद्धान्त्येकदेशिनोरुक्तित्वादिति तत्त्वम् ॥

मिदचोऽन्त्यात् परः । १ । १ । ४७ ॥

प्रयोजनप्रश्नेऽपवादत्वाभिधानमसङ्गतमत आह

किमिति । (भा)

किं व्यावर्त्यत्वेन प्रयोजनमित्यर्थः । किं स्थानेयोगत्वमुत प्रत्यय-परत्वमपीति प्रश्न इति भावः । उभयापवादत्वे बीजन्तु तत्र तत्र मित्त्ववैयर्थ्यरूपम्पूर्वसूत्र एवोक्तम् ॥ ननु [१]"नपुंसकस्ये"ति सूत्रे "झलच" इति पंचमीति क्व स्थाने योगत्वप्रसङ्गोऽत आह

नपुंसकस्येति । (कै)

पंचम्यां हि [२]"तस्मादि"ति परिभाषोपस्थाने "यञ्ञिभि" "ज्ञानानि" इत्युभयोरप्यसिद्धिरिति षष्ठ्येवेति भावः ॥ भाष्ये

---

१ अ १ । पा १ । सू ७२ ॥
२ तस्मादित्युत्तरस्य । १ । १ । ६७ ॥

[1] नैवेश्वर इति। (भा)

ईश्वरो वेदः। धर्मसूत्रं धर्मशास्त्रम्॥ भाष्ये "अपवादैः" इत्यस्याऽसम्भवे इत्यादिः। [2]क्वचित्तथैव पाठः॥ "बाध्यन्ताम्" इति लोट्॥ मग्ने मस्जेर्जात्पूर्वनुमि [3]"अनिदिताम्" इति लोपे सस्य संयोगादिलोपे कृते निष्ठानत्वे रूपम्। अन्याचः परे तु सति अविशेषेण संयोगत्वे संयोगादिलोपसिद्धावपि तस्याऽसिद्धत्वान्नस्योपधात्वाभावान्नलोपो न स्यादिति भावः। संयोगादिलोपस्तु "बह्वनां समवधाने बह्वनामेव संयोगसंज्ञा" इति पक्षे फलत्वेन बोध्यः॥ "मङ्क्ता" इत्यादि त्वनुषङ्गलोपाभावेऽप्युदाहरणमुक्तं भाष्ये।

---

१ अत्राह भगवान् महाभाष्यकारः। अस्ति हि सम्भवो यदयमचोऽन्त्यात्परश्च स्यात् स्थाने चेति। एतदपि युक्तम्। कथम्। नैवेश्वर आज्ञापयति नापि धर्मसूत्रकाराः पठन्त्यपवादैरुत्सर्गा बाध्यन्तामिति। किं तर्हि। लौकिकोऽयं दृष्टान्तः। लोके हि सत्यपि सम्भवे बाधनम्भवति। तद्यथा। दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेति। सत्यपि सम्भवे दधिदानस्य तक्रदानं निवर्त्तकं भवति। एवमिहापि सत्यपि सम्भवे अचामन्त्यात्परत्वं * षष्ठीस्थानेयोगत्वं बाधिष्यते॥

२ "अपवादैः" इत्यस्याऽसम्भव इत्यादिः। क्वचित्तथैव पाठः। इत्युक्तं नागेशेन। परं तु नाद्यापि कस्मिंश्चिद्भाष्यपुस्तके एवंविधपाठो दृश्यते॥

३ अ ६। पा ४। सू २४॥

---

* "षष्ठी" इति बहुषु भाष्यपुस्तकेषु न दृश्यते॥

[1]ऊमौमावौणादिकौ ॥ ननु च अन्त्यादचः परत्वं तस्य च वर्णान्तरावयवत्वमिति विरुद्धमत आह

सङ्घातेति । (कै)

"अन्त्याद्" इत्यनेन समुदायाक्षेपेण समुदायस्योपस्थितत्वात्-समुदायावयवसन्निधौ समुदायग्रहणस्य न्याय्यत्वाच्च वर्णस्य वर्णावयवत्वासम्भवाच्चेत्याशयः ॥ नन्वादिरित्यनुवृत्तौ पूर्वादित्वं कुतो न इत्यत आह

न हीति ॥ (कै)

परादित्वमिति । (कै)

वाचनिकमेव वर्णस्य वर्णावयवत्वं "[2]ङःसीति" धुडादेरिवेति भावः ॥ "[3]अभक्ते" इति वार्त्तिकस्थेते न मिथन्तीति शेषः ॥ नन्वभक्तत्वेऽपि नान्तमस्त्येवेत्यत आह

---

१ "भरूजाः" इति । भृञ्जधातोरौणादिकेऽचि कृते, गुणे रपरत्वे च जकारात् पूर्वं ऊमागमः ॥ "मरीचयः" इति । चौरादिकमर्च-धातोर्णिचि "अच इः" (उ – ४ पा । सू ५७८) इति इ प्रत्यये णिलोपे "मृकृणिभ्यामीचिः" (उ–४ पा । सू ५०९) इत्यनेन चकारात् पूर्वं ईमागमः । भर्जिमर्च्योश्च (वा) भर्जिमर्च्योश्चाऽन्तात् पूर्वौ मिदचावित्यर्थः ॥ वस्तुतो निपातनात् सिद्धम् । भरूजाशब्दो "अङ्गुल्यादिषु" (अङ्गुल्यादिभ्यष्ठक् । ५ । ३ । १०८) पठ्यते मरीचिशब्दो "बाह्वादिषु" (बाह्वादिभ्यश्च । ४ । १ । ९६) ॥

२ अ ८ । पा ३ । सू २९ ॥

३ अभक्ते दीर्घनलोपस्वरणत्वानुस्वारशीभावाः । वा ॥

नान्तमङ्गमिति । (कै)

दीर्घविधावङ्गाधिकारादिति भावः ॥

गौरवापत्तिरिति । (कै)

प्रतिपत्तिगौरवापत्तिरित्यर्थः ॥

[१]चौ ते इति । (भा)

[२]"अग्नेश्चन्दसि बहुलम्" इति अग्नेर्लोपः । चीणि वाजिनानि तानि तानीत्यर्थः ॥

नुमेति । (कै)

व्यञ्जनाविद्यमानवद्भावस्तु [३]हल्स्वरप्राप्तौ स्वरोद्देश्यकविधिप्राप्तौ वा नान्यत्रेति भावः ॥ [४]सुपीति न तदन्तसप्तमीत्यभिमानेनेदम् ॥

उत्तरपदस्येति । (कै)

एवं च सर्वपत्रेष्वपीदमावश्यकमिति भावः । भगशब्दादिनौ तन्नकारः प्रातिपदिकान्तो भवतीति भगिनीत्यत्राऽनुच्यमाने उत्तरपदस्येत्यस्मिन् णत्वप्रसङ्गः । भगिनीत्यत्र च ङ्यन्तमुत्तरपदं न नान्तम् । सूचन्तु माषवापिणादित्यादौ चरितार्थमिति भावः ॥

स हीति । (कै)

नुम्विधावङ्गस्येत्यधिकारादित्यर्थः । एवं च माषवापाणीत्यादि-

---

१ अग्ने चौ ते वाजिना चौ षधस्था ता ता पिण्डानाम् । भा ॥

२ अ ६ । पा १ । सू ७० ॥

३ हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत् । परिभाषेन्दु ८० ॥

४ सर्व्वस्य सुपि (६ । १ । १६१) इत्यत्र ॥

सिध्यर्थं नुमग्रहणमिति भावः । समासरूपप्रातिपदिकान्तस्येत्यर्थेन गर्गभगिनीत्यस्य व्यावृत्तौ माषवापाणीत्यस्य सिद्धौ च प्रहिण्वन्नित्याद्यर्थं नुमग्रहणमावश्यकमिति तत्त्वम् । द्विषन्तपादौ [१]"द्विषत्परयोर्लापेः" इति खच् । खचि हृस्वः । [२]"अरुर्द्विषद्" इति मुम् ॥

प्रसङ्गेति । (कै)

द्विषद्ग्रहणेन मुमिगिष्टस्य ग्रहणे तस्य पदत्वात् तकारस्य संयोगान्तलोपे एकदेशविकृतन्यायेन द्विषमित्यस्य मान्तस्य पदत्वात् सिद्धोऽनुस्वार इत्यर्थः । वस्तुतस्तस्य न्यायस्याद्याप्यज्ञानात्तदनाश्रयेणेदम् । बहिरङ्गासिद्धत्वं चिपाद्यां नेति तत्रोक्तम् । "वहंलिहे" [३]"वहाभ्रे लिह" इति खश् ॥ [४]"परादौ" इति वार्त्तिके [५]"ग्रीभावेनकारप्रतिषेध" इति पाठः । "ग्रीभावे' इत्यलुगार्षः । एते दोषस्थानानीति शेषः ॥ टजभावाय नपुंसकत्वाय चाह

बहुव्रीहिरिति । (कै)

भाष्ये

अग्रे चीत इति ॥ (भा)

ननु परादिपचे [६]"नलोपः प्रातिपदिकान्तस्य" इत्यस्याप्राप्ता-

---

१ अ ३ । पा २ । सू ३९ ॥

२ अ ६ । पा ३ । सू ६७ ॥

३ अ ३ । पा २ । सू ३२ ॥

४ परादौ गुणवृद्ध्योर्दीर्घनलोपानुस्वारग्रीभावेनकारप्रतिषेधः (वा) ॥

५ ग्रीभावेनकारप्रतिषेधाः । क । ग । इ ॥

६ अ ८ । पा २ । सू ७ ॥

वपि [1]"ग्रेश्छन्दसि बहुलम्" इत्यनेन नलोपः सिद्ध इति चेन्न। [2]निर्दिश्यमानपरिभाषयाऽ[3]लोन्त्यपरिभाषया च दकारस्यैव लोपापत्तेरित्याशयात् ॥

तद्गृहीतत्वात्पदान्त इति । (कै)

[4]"यदागमा" इत्यस्य तद्ग्राहकेण शब्देनागमस्य ग्रहणमित्यर्थ इति भावः ॥

न हि द्वयोरिति । (कै)

ननु संयोगान्तलोपे उक्तरीत्याऽस्येवमस्य पदान्तत्वमितिचेदुक्तमेवैतत् ॥

न तदन्तस्येति । (कै)

पादन्तस्यानुच्चारणादिति भावः ॥

श्रुतिसन्निपातीति । (कै)

उच्चारितमितियावत् ॥

धानाश्ष्कुलिनीति । (भा)

समाहारद्वन्द्वे तद्धित्वविवक्षायां द्विवचनम् ॥ तच्च पूर्वं ह्रस्वस्ततो नुमि नास्ति दोष इत्यत आह

नित्यत्वादिति । (कै)

---

१ अ ६ । पा १ । सू ७० ॥
२ परिभाषेन्दु — १२ ॥
३ अ १ । पा १ । सू ५२ ॥
४ परिभाषेन्दु — ११ ॥

इदं च पदस्य विभज्याऽन्वाख्यानपक्षे बोध्यम् ॥

अनजन्तत्वादिति । (कै)

"अच" इत्यनेन प्रातिपदिकस्य विशेषणादित्यर्थः ॥

परत्वादिति । (कै)

यद्यपि कार्यैक्ये यौगपद्यसम्भवेन विरोधाऽभावे परत्वादित्यसङ्गतं तथापि नुमि कृते उभयोरप्राप्त्योभयोः सम्भवसत्त्वेन च न भाष्ये काचिदनुपपत्तिः । अत एव भाष्ये "नपुंसकोपसर्जनह्रस्वत्वम्" इति संश्लिष्टमेवोक्तमिति बोध्यम् ॥

तथैवेति । (कै)

अनजन्तत्वादिति भावः ॥

अन्तरङ्गो बलीयानिति । (कै)

[१]असिद्धं बहिरङ्गमित्येव समानकालप्राप्तिकबहिरङ्गासिद्धत्वबोधकं पूर्वजातबहिरङ्गासिद्धत्वबोधकं चेति भावः । अत एव भाष्येणाऽविरोधः । [२]अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः ॥ पञ्चारत्निशब्दे समाहारे द्विगुः । [३]प्रमाणे मात्रचो लुम्वा ॥

---

१ असिद्धं बहिरङ्गमन्तरङ्गे । परिभाषेन्दु–५० ॥

२ अकृतव्यूहाः पाणिनीयाः । परिभाषेन्दु–५६ ॥

३ अ ५ । पा २ । सू ३७ ॥

एच इग्घ्रस्वादेशे। १। १। ४८॥



विनापीति। (कै)

वक्ष्यमाणसूत्रप्रत्याख्यानप्रकारेणेति भावः॥ एच इति वक्तव्ये एङ् इति अनुचितमत आह

एङ् इति॥ (कै)

प्रश्लिष्टेति। (कै)

पांशूदकवदित्यर्थः। प्रश्लिष्टावर्णत्वादिनाप्यान्तरतम्यं गृह्यत इति भावः॥ ऐचोस्तदप्राप्तौ हेतुमाह

नत्विति। (कै)

ऐचौ वर्द्धौ न स्त एवेति भावः॥ सवर्णाकारनिवृत्त्यर्थमित्येतद्विषयभेदेन योज्यत इति बोध्यम्। कर्मधञन्तसमाहारशब्दस्य वर्णशब्देन न बहुव्रीहिर्वर्णैकदेशस्य वर्णत्वाभावादत आह

समाहियमाणावयवेति। (कै)

[1]मध्यमपदलोपी समास इति भावः॥ "मात्रावर्णस्य" इति भाष्यस्य मात्राकालावर्णादिसदृश ऐचोरवयव इति तात्पर्यम्॥

---

१ समानाधिकरणाधिकारे प्राकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च। (वर्णो वर्णेन। २। १। ६९। एतत्सूत्रस्यवार्त्तिकम्)।

माचावयव इति। (कै)

तत्सदृशस्यैतयोरवयव इत्यर्थः ॥ नन्वस्य नियमत्वेन ह्रस्वविधेकवाक्यतया कथं दीर्घप्राप्तिरत आह

स्वतन्त्रमिति। (कै)

नियमत्वेऽनुवादादिदोषाद्विधित्वमेव न्याय्यमित्यभिमानः ॥

भाव्यमानस्येति। (कै)

सम्बन्धसामान्ये षष्ठी ॥

देवेति। (कै)

देवदत्तेत्येतद्विषयक [1]"गुरोरनृत" इत्येतत्सूत्रविधावित्यर्थः। आदिनोदात्तादिस्वरसंग्रहः ॥ नन्वनेनदीर्घे पुनस्तेन लक्षणेन ह्रस्वः स्यादत आह

ह्रस्वस्येति। (कै)

अपवादस्य प्रवृत्त्या तद्विषये उत्सर्गाप्रवृत्तेरिति भावः ॥

एकवाक्यभावेनैव इति। (कै)

एकवाक्यभावो नामैव इगित्यस्य ह्रस्वे शेषभावो न तु परस्परवियोगाभावः। अन्वयस्तु वाक्यभेदेनैवेति एतदजानानो नोद्यति।

समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानं कर्त्तव्यमुत्तरपदलोपश्च वक्तव्यः। शाकभोजी पार्थिवः। शाकपार्थिवः। कुतपवासाः सौश्रुतः। कुतपसौश्रुतः। यद्यपि पूर्वपदस्य तत्तदर्थे लक्षणायां विशेषणसमासेन सिद्धं तथापि मुख्यार्थे शाकप्रियपार्थिव इत्यादि निवृत्त्यर्थमिदम् ॥

१ अ ८। पा २। सू ८६ ॥

यदीति ॥ (कै)

उक्ताभिप्रायेणैवोत्तरयति

पूर्वं ह्रस्वेति। (कै)

एवं हि परिभाषाद्वयस्याप्यनुग्रहो भवतीति भावः ॥

एकारस्येति। (कै)

यत्तु कण्ठताल्वादिस्थानत्वेऽपि विप्रतिषेधेन पूर्वावयवो न स्थान्तरतमादेशप्रयोजकः किन्तु परावयव एवेति न दोष इति। तन्न। स्थान्यगतपरत्वमादाय विप्रतिषेधशास्त्राऽप्रवृत्तेः स्थानिवत्-प्रकरणभाष्ये स्पष्टत्वात्। किन्त्वन्तरङ्गत्वेन पूर्वावयव एव तथेति बोध्यम् ॥ भाष्ये

[1]अर्द्ध एकार ओकारो वा न भविष्यतीति। (भा)

तयोरसत्त्वादिति भावः ॥ इतरस्तु सस्थानत्वाभावादिति हेतु-रनेनोक्त इति मत्वा नोद्धयति।

ननु चेति ॥ (भा)

सस्थानतराविति। (भा)

---

१ एङः सस्थानत्वादिकारोकारौ भविष्यतोऽर्धं एकारोऽर्धं ओकारो वा न भविष्यति ॥ ननु चैङः सस्थानतरावर्धैकारार्धौकारौ। न तौ स्तः। यदि हि तौ स्यातां तावेवायमुपदिशेत् ॥ ननु च भोश्छन्दो-गानां साल्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं चाधीयते। "सुजाते ए अश्वसूनृते"। "अध्वर्यो ओ अद्रिभिः सुतम्"। "शुक्रं ते ए अन्यद्यजतं ते ए अन्यदिति"। पार्षदकृतिरेषा तत्र भवतां नैव लोके नान्यस्मिन् वेदेऽर्धं एकारोऽर्धं ओकारो वास्ति ॥

कण्ठतालुस्थानमिति पक्षेऽपि तालुस्थानसाम्यमत्वमिति बोधयितुन्नरनिर्देशः ॥ स्वाग्रयं प्रकटयति

न तौ स्त इति ॥ (भा)

तावेवेति । (कै)

प्रत्याहारसूत्र इति भावः । एतच्च [१]"एओङ्" सूत्रे निरूपितम् ॥

पार्षदेति । (भा)

तत्र भवतां या पर्षत्सभा तत्र भवेत्यर्थः । भाष्यप्रयोगादेव गमकत्वात्साधुत्वं बोध्यम् ॥

[२]भूयस एवेति । (भा)

भूयोऽग्रस्याऽऽन्तरतम्यप्रतियोगितया ग्रहणमित्यर्थः ॥ ब्राह्मणस्वामिकयामस्य भूयसा व्यपदेशे दृष्टान्तत्वाऽसङ्गतेराह

वास्तव्यत्वे इति । (कै)

वास्तव्यः कर्त्तरि तव्यान्तः । कुलालकर्मारवर्द्धकिनापितरजकाः पञ्चकारुकी ॥

---

१ ए ओङ् । ३ । प्रत्याहारसूत्रम् ॥

२ अकारनिवृत्त्यर्थमपि नार्थः । ऐचोश्चोत्तरभूयस्त्वात् । वा । एचोश्चोत्तरभूयस्त्वादवर्णो न भविष्यति । भूयसोमात्रेवर्णावर्णयोरल्पीयस्य वर्णस्य । भूयस एव ग्रहणानि भविष्यन्ति । तद्यथा । ब्राह्मणग्राम आनीयतामित्युच्यते तत्र चावस्तः पंचकारुकी भवति ॥

षष्ठी स्थानेयोगा । १। १। ४९ ॥

युक्तिरिति । (कै)

षष्ठीति स्त्रीलिङ्गविशेषणत्वादिति भावः ॥

निपातनादिति । (कै)

तृतीयान्तस्य समासे तृतीयाया लुक्स्यैवमित्यर्थः । तृतीयायाः स्थाने एतद्विधाने तु अन्तरङ्गबाधे मानाभावादिनादेशेऽन्यस्य स्याद् लुग्बाधे मानाभावाच्च वृद्ध्यापत्तेश्च । अत एवेवं नोक्तमिति बोध्यम् । अत्र स्थानमात्रीयादयः षष्ठ्यर्थसम्बन्धनिरूपका न तु षष्ठ्यर्था इति न [1]मतुप्सूत्रस्य भाष्यविरोधः । अत एवात्र भगवता सप्तम्यन्तेन तृतीयान्तेन वा समासो दर्शितः । न तु समानाधिकरणबहुव्रीहिः । तद्ग्रहणतोक्तं स्थाननिमित्तसम्बन्धेत्यर्थ इति ॥ ननु आदेशविधौ स्थानशब्दाभावेन कथं स्थाननिमित्तः सम्बन्धोऽत आह

यथेति । (कै)

तथा च देवदत्तस्य यज्ञदत्त इत्युक्ते किमित्याकाङ्क्षावशात्पुत्र इत्यध्याहारो यथा तथा प्रदेशेषु स्थानपदाध्याहारेण वाक्यैकदेशन्यायेन वा बोध इति भावः ॥

अर्थे चेति । (कै)

---

१ तदस्यास्त्यस्मिन्निति मतुप् । ५ । २ । ९४ ॥

वाचकत्वसम्बन्धेनेति भावः ॥ [1]"अस्तेः प्रसङ्गे" इत्यस्य व्याख्या "अस्तेः प्राप्तौ" इति ॥

प्रयोग इति । (कै)

"स्वाभाविक" इत्यनुषज्यते शब्दनित्यत्वभङ्गापत्या स्थानशब्दो निवृत्तिवाची नोपपद्यते इति भावः । रम् विधौ रोपधघटित-स्यार्थे रम्घटित इत्यर्थे न क्तिरित्यचारुचिः ॥

आरब्धे चेति । (कै)

तत्रातिप्रसङ्गकरणाय "व्याख्यानत" इत्येतदाश्रयणे तयैव सिद्धौ परिभाषेयं व्यर्थेति भावः ॥ षष्ठीदण्डकपाठो ग्रन्थविशेषः ॥ भाष्ये

षष्ठ्यर्था इति । (भा)

षष्ठीप्रयोजकास्तदर्थान्वयिनः शब्दाः शतमित्यर्थः । यद्वा षष्ठ्यर्थानां शतत्वे तेषां शतत्वमर्थसिद्धं बोध्यम् ॥ [2]"एकशतम्" इति निर्णयेनाभिधाय पुनः सन्दिग्धाभिधानमयुक्तमत आह

शब्द इति ॥ (कै)

वाशब्दो वाक्यालङ्कारे ॥ भाष्ये

प्राप्नुवन्तीति । (भा)

तेषां सर्वेषां बोधः प्राप्नोतीत्यर्थः ॥ "नियमेन" । प्रकृतसूत्रेण ॥

शासिनेति । (कै)

---

१ अत्रैव कैयटे ।

२ एकशतं षष्ठ्यर्था यावन्तो वा सन्ति ते सर्वे षष्ठ्यामुच्चारितायां प्राप्नुवन्ति । भा ॥

तस्य स्थानषष्ठीत्वेनोपधाविशेषणे सामर्थ्याभावादिति भावः॥

भाष्ये

अवयवषष्ठ्यादीनामिति। (भा)

अवयवषष्ठ्यादीनामिष्टानां निवृत्तये नियमाप्राप्तिरिति वार्त्तिकार्थः॥

दक्षिणो यस्येति। (कै)

दक्षिणो हस्तो यस्य सन्निहित इत्यर्थः॥

तिर्यक्पथः। (भा)

अनृजुमार्ग इत्यर्थः। पूर्वपश्चिमाऽन्यतरदिग्गि गच्छतो दक्षिणोत्तरमार्ग इति यावत्॥

विशिष्ट इति। (कै)

निर्णयविशिष्ट इत्यर्थः॥ अयमेव भाष्येऽव्यक्तशब्दस्यार्थः। अत्र पक्षे योगशब्दः कर्मव्युत्पत्त्या सम्बन्धिपरः॥ [१]"योगवति" इति पक्षेऽप्येवमेव। स्थानरूपसम्बन्धिनियमार्थत्वादस्य॥ [२]"विशिष्टा वा" इति वार्त्तिकं व्याचष्टे।

अथवा किंचिदिति॥ (भा)

भाष्ये

---

१ अथवा योगवती योगा। का पुनर्योगवती। यस्या बहवो योगाः। कुत एतत्। भूम्नि हि मतुप् भवति। भा॥

२ विशिष्टा वा षष्ठी स्थानेयोगा। वा। अथवा किं चिह्निङ्गमासज्य वक्ष्यामीत्यं लिङ्गा षष्ठी स्थानेयोगा भवतीति। भा॥

कश्चिदेकदेशस्य इति । (भा)

इदं च यथोद्देशपक्षे सृष्टमेव कार्यकालपक्षेऽपि स्वविषयसर्वशास्त्रैकवाक्यत्वादेवमुक्तिः ॥ पठितदेशस्थेनैव तत्र तत्र तद्बुद्धिजननात् । दीपो यथा प्रभाद्वारा सर्वगृहप्रकाशक एवमेतत्स्वबुद्धिजननद्वारा सर्वशास्त्रोपकारकं न तु तत्पक्षेऽप्यचेतनस्य शास्त्रस्य स्वदेशं विहाय तद्देशे गमनमस्तीतिबोध्यम् । पठितदेशस्थत्वमेव सर्वथा बोधयितुमेकदेशस्य इत्युक्तम् ॥

तस्यानिर्देशार्थ इति । (भा)

अधिक्रियमाणस्यानुच्चारणार्थ इत्यर्थः ॥

यदेवाऽद इति ॥ (भा)

शब्दाधिकार आश्रयिष्यत इत्यर्थः ॥

अनुमानमिति । (कै)

[1]"उच्चारित एव प्रत्यायक" इत्यणुदित् सूत्रस्थभाष्यविरुद्धमिदम् । तस्माद्वोद्धुरनुमानपूर्वकमुच्चारणन्नत्वाचार्य्यस्येत्यर्थः । शास्त्रप्रणयनकालिकतत्कृतलिङ्गाऽऽसङ्ग एवैतच्छास्त्रप्रवृत्त्युपयोगी नान्यकृतोऽतिप्रसङ्गात् । पाणिनिना त्वनुच्चारणाच्छास्त्रप्रणयनकाले लिङ्गाऽऽसङ्गः कर्त्तुमशक्य इति भावः ॥ भाष्ये

---

१ ऋस्वसंप्रत्ययादिति चेदुच्चार्यमाणसंप्रत्यायकत्वाच्छब्दस्यावचनम् । वा । ऋस्वसंप्रत्ययादिति चेदुच्चार्यमाणः शब्दः संप्रत्यायको भवति न संप्रतीयमानः । तद्यथा । ऋगित्युक्ते संपाठमात्रं गम्यते नास्या अर्थो गम्यते ॥

सम्प्रत्ययमाचमिति । (भा)

स्वरितत्ववत्तात् म एवोत्तरत्रेतिज्ञानमाचमाचार्य्यकृतमित्यर्थः ॥ "आमङ्कम्" इत्यस्याचार्य्येणेति शेषः ॥

यदि नियम इति । (भा)

स्थाननिमित्तसम्बन्धार्थकत्वनियम इत्यर्थः ॥

अनेकं विशेष्यम् । (भा)

प्रमङ्गरूपमवयवरूपं च तचाऽऽद्यं [1]"आ हावि"त्यादौ अन्त्यं तु भाष्ये एव वक्ष्यति ॥

तच न सिध्यतीति । (भा)

अवयवादिनिमित्तसम्बन्धार्थकत्वं न सिध्यतीत्यर्थः ॥

अणपीति । (भा)

[2]"हल" इति सूत्रे तृतीये दीर्घव्यावृत्त्यर्थमण्ग्रहणस्यापि सम्बन्धादिति भावः । तच [3]"अलोऽन्त्यस्य" इत्येकवाक्यतया अङ्गावयवाद्धलः परं यदङ्गान्त्यावयवाणरूपं सम्प्रसारणं तस्य दीर्घ इति सूत्रार्थः । तच "अङ्गस्य" इत्यस्य "आ हावि" त्यादौ स्थानषष्ठीत्वे हलादिनिरूपितमवयवषष्ठीत्वं न सिध्येदित्यर्थः ॥

स्थानेति । (कै)

तत्त्वाद् "हल" इत्यादिनाऽवयववाचकेन विशेषणविशेष्यभावो न स्यादित्यर्थः ॥

---

१ अ ६ । पा ४ । सू २५ ॥ २ अ ६ । पा ४ । सू २ ॥
३ अ १ । पा १ । सू ५२ ॥

विशेषावसाय इति । (कै)

तत्तद्व्यव्यर्थकपदकल्पनयेति भावः ॥

आर्थाः । (भा)

स्वस्वामित्वादयः ॥

यौनाः । (भा)

पितृत्वादयः ॥

[१]मौखः । (भा)

गुरुशिष्य भावः ॥

[२]स्रौवाः । (भा)

ऋत्विक्त्वादयः ॥

स्थाने अनन्तरे इत्यादि । (भा)

स्थानादिरूपसम्बन्धिसन्देह इत्यर्थः । आनन्तर्य्यमव्यवधानम् । सामीप्यं साधारणम् ॥

अन्तरङ्गत्वादिति । (कै)

स्थानशब्दोऽर्थवाची प्रसङ्गवाची वोभयथाप्यन्तरङ्गत्वं स्थानिवदादेश इतिज्ञापकमप्यत्र बोध्यम् ॥

निर्दिश्यमानमिति । (कै)

उच्चार्य्यमाणमित्यर्थः । निर्दिश्यमानं षष्ठ्यन्तमेवेत्यन्वयः । निर्दिश्यमानपदस्य चाध्याहार इति भावः ॥

---

१ "मौखाः" इति भाष्यम् ॥

२ स्रौनाश्चेति । श्रौचाश्चेति पाठान्तरम् ॥

न बाध्यते इति। (कै)

किन्तु स्वव्यवस्थापकत्वेनाऽऽश्रीयत इत्यर्थः। एव "मनेकाल्सूत्र"-मत्रोऽप्येतत्परिभाषाबोधित एव गृह्यते। [१]"षट्न" इत्यादावपि आदेशैः पाणिनिकृतस्थान्युच्चारणाऽनुमानाद्व्यवस्थार्थत्वाद्वा न दोषः। यत्तु "अलोऽन्त्यस्य" [२]"आदेः परस्य" इत्यस् एतद्बाधकाविति तत्तु [३]"उदश्वा" इति [४]"पादः पद्" इति सूत्रस्यभाष्यविरुद्धम्। व्यवस्थापकत्वे सम्भवति बाधकत्वकल्पनानौचित्यग्रस्तं च॥

स्थानेऽन्तरतमः। १। १। ५०॥

इति प्रश्न इति। (कै)

एवं च परोक्तोदाहरणदूषणायाऽयम्प्रश्नो न तूदाहरणासम्भवकृत इति भावः॥ उदाहरणप्रश्ने [५]"इकोयणचि" इत्यस्योल्लेखो व्यर्थोऽत आह

अस्य सूत्रस्येति। (कै)

सामान्यतो ज्ञातस्य विशेषाकारेण यत्र प्रतिपत्तिस्तदुदाहरणमिति भावः॥

---

१ अ ६। पा १। सू ६३॥ २ अ १। पा १। सू ५४॥
३ अ ८। पा ४। सू ६१॥ ४ अ ६। पा ४। सू १३०॥
५ इको यणचि। ६। १। ७७॥

षट् षष्टिरिति । (कै)

ऌवर्णस्य दीर्घाभावात् दीर्घप्लुतऋकारस्य प्लुतऌकारस्य चाऽनुनासिकस्याऽदर्शनादिदं चिन्त्यम् ॥

[1]सन्नेति । (कै)

रेफस्य सानुनासिकस्याऽभावादिति भावः । इदं चिन्त्यम् । [2]"अणुदित्" सूत्रेऽण्ग्रहणसामर्थ्येन यणग्रे गुणभेदकत्वस्यैव न्याय्यत्वेन विधीयमानत्वेन च तेषामग्रहणात् । तत्प्रत्याख्यानेऽपि आरम्भप्रत्याख्यानयोः फलाऽभेदाय भेदकत्वस्यैवाऽऽश्रयणेन तेषामग्रहणम् । अत एव मतोर्मस्य नानुनासिको वकार इति ।

संख्यातानुदेशः । (भा)

क्रमेणान्वयः ॥

शब्दत इति । (कै)

अयं भावः । यथा[3]"स्तोः श्चुना श्चुः" इत्यत्राऽर्थवैषम्येऽपि बोधकशब्दसाम्याद् यथासंख्यं तथा इक्पदयणपदाभ्यामनेकोपस्थितावपि बोधकशब्दतः साम्यमस्त्येवेति न दोष इति । न च ऋकारे ऌकारस्य ऌकारे रेफस्य चाऽऽपत्तिः । ऋदिदृदितोर्भेदेन निर्देशात् सावर्ण्यानित्यत्वेनाऽत्र ऋऌभ्यान्न ऋकारऌकारयोर्ग्रहण-

---

१ "क" पुस्तके "सन्त्येति" इति पाठोऽस्ति तत्त्वपपाठः कैयटे अदर्शनात् ॥

२ अ १ । पा १ । सू ६९ ॥

३ अ ३ । पा १ । ३३ ॥

मिति नोक्तदोष इति तदाशयात् ॥ ननु ऌकारोदाहरणाभावात् कथं यथासंख्यमत आह

घस्लेति । (कै)

वस्तुतः प्रतिपत्तिकालिकं संख्यासाम्यमेव यथासंख्य[1]प्रवृत्तिनियामकं, न तु लक्ष्यसंस्कारकालिकमपीति प्रत्याहाराङ्गिके भाष्ये स्पष्टत्वान्नायं दोष इति बोध्यम् ॥ अनुनासिकस्थाने सानुनासिकार्थमपि न तच्चैतदुपयोगः । विधेयेऽपि गुणभेदकपक्षस्यैव सत्त्वेन तत्र तदप्राप्तेः । आदेशानां तत्स्थानापन्नत्वेन न तदर्थत्वं किन्तु स्वभावत एव शब्दार्थसम्बन्धानां नित्यत्वादित्याशयेन भाष्ये

एकार्थ इति ॥ (भा)

तावन्मात्रोक्तौ तमस्तमपि प्राप्नोति यमस्तामपीत्यत आह

सादृश्येति । (कै)

उत्तमे प्रत्यक्त्वरूपोऽहङ्कारास्पदचेतनधर्मो मध्यमे अहङ्कारानास्पदचेतनधर्मः पराक्त्वं प्रथमे त्वनियतम् ॥ भाष्ये

अनुवर्त्तमान इति । (भा)

एकदेशे स्वरितत्वप्रतिज्ञानादिति भावः ॥

वाक्यभेद इति । (कै)

अनुवृत्तप्रसङ्गवाचिस्थानशब्देनैकं वाक्यं तास्वादिवाचीहत्यस्थानशब्देनापरम् ॥ अत्र च "स्थाने" इति तृतीयार्थे सप्तमीति भावः ॥

तमग्रहणमनर्थकमिति । (कै)

---

१ प्रवृत्तौ नियामकम् । क । ग । ङ ॥

प्रसङ्गे स्थानकृतान्तर्य्यवानित्यर्थेनैव सिद्धे स्थानेग्रहणं न वाक्यभेदे मानमितीदमुक्तं तथैकवाक्यतायान्तु स्थानकृतान्तर्य्याऽभावे तद्धसतीत्यादावव्यवस्थैव स्यात् । वाक्यभेदे तु सादृश्यान्तरमादाय तत्र व्यवस्थेति भावः ॥

ऊष्मत्वेति । (कै)

सहग्रब्दप्रयोगोपपत्तये धर्मपर ऊष्मग्रब्द इति भावः ॥ नन्वनन्यथासिद्धोदाहरणरूपप्रयोजनोक्तेः पुनः प्रश्नानुपपत्तिरत आह

यदीति । (कै)

सूत्राभावे किमनिष्टमिति प्रश्नतात्पर्य्यमिति भावः ॥

बहव इति । (कै)

एवं चैकत्वनिर्देशादित्यनुपपन्नमिति भावः ॥

प्रयोग इति । (कै)

अक इत्येतद्बोध्यः स्थानी प्रयोगे एकत्वविशिष्ट उच्चार्य्यत इति भाष्याऽक्षरार्थः ॥ यद्यपि पूर्वपरयोरित्युक्तेरेकः स्थानीत्ययुक्तं तथापि तत्समुदायाभिप्रायेणेदम् । युगपदेककर्त्तृकं सर्वोच्चारणमग्रक्यमत आह

पर्य्यायेणेति ॥ (कै)

येन प्रकारेण संहिता पाठलक्षणेन (कै)

इति पाठः । अनेन संहितापाठ एव पूर्वं स्थित इत्युक्तम् ॥ अस्तु तर्हि विच्छिद्यपाठोऽत आह

[१]पदप्रकृतिरिति । (कै)

षष्ठीतत्पुरुषः । बहुव्रीहिरित्यन्ये । तत्प्रकृतग्रन्थाननुगुणम् ॥ भाष्ये

सा किं प्रकृतित इति । (भा)

"सेति" इयमित्यस्य प्रतिनिर्देशः । इदं शब्दोऽपि यच्छब्दार्थः क्वचित् । केचित्तु येत्यर्थे यथा पुनरिति अव्ययसमुदायं वदन्ति । अन्तरतमशब्दार्थस्य विशेषणत्वेन या प्रतिपत्तिः सा किं सौचस्थानशब्दस्य तिष्ठत्यस्मिन्नादेशा इत्यधिकरणव्युत्पत्त्याऽन्तरतमे स्थानिनीत्यर्थात् स्थानिनमिति उताऽऽदेशमितीत्यर्थः ॥

षष्ठीति वर्त्तत इति । (कै)

अन्तरतमेऽर्थादादेशस्य स्थानिनि षष्ठी उपसंहर्त्तव्येत्यर्थः ॥ [२]"यत्रैव षष्ठी"त्यादि तु पर्य्यवसितार्थकथनम् ॥ ननु भाष्ये संख्यातानुदेशेनैतदुदाहरणस्य दूषितत्वात् पुनरुपन्यासोऽयुक्तोऽत आह

आदेशेति ॥ (कै)

[३]भवत्येवैतदिति । (कै)

दौर्घव्यावृत्तये इत्यर्थः ॥ भाष्ये

---

१ पदप्रकृतिः संहिता ॥

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तत्वन्नीतिः ।
शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्य्यात् पौर्वापर्य्यम् ॥

२ यत्रैव षष्ठी तत्रादेश इति प्रकृतिर्निगद्यते ॥

३ भवत्येतदिति । ग । इ । उपलब्ध कैयट पुस्तके "भवत्येवैतदुदाहरणम्" इत्यस्ति ॥

इको गुणवृद्धी इति । (भा)

विधेकवाक्यतापन्नस्य खण्ड इति बोध्यम् ॥ नन्विको गुणवृद्धी इत्युक्ता "चायक" इत्युदाहरणमसङ्गतमत आह

अच इति । (कै)

केचित्तु इको यच गुणवृद्धी इष्टे तचेति भाष्यार्थान्न दोष इत्याहुः॥ ननु ऋकारस्येगचोरन्तभावात् पुनरुपन्यासो वृथेत्यत आह

ऋकारस्येति । (कै)

एवं च मप्रत्ययान्तच्छेदो लक्ष्याऽसिद्धा दुष्ट इति भावः ॥

यादृश इति । (कै)

अचीत्यनुवृत्त्याऽचि परतो यस्य चो वान्तो दृष्टस्तस्य यि प्रत्यये म इति व्याख्येयमित्यर्थः । अन्ये तु वाच्यवृत्त्येदृग्रूपार्थस्याऽलाभाद् यि प्रत्यये इति दृष्ट्वाऽचीत्यस्याऽसम्बन्धाच्च भाष्योक्तं वचनमेव ज्यायः इत्याहुः ॥ भाष्ये

[1]क्षिज्योरेवेति । (भा)

ह्रस्वनिर्देशात् "चौ" इति दीर्घान्तस्य "जै जय" इत्यस्य च नेदं निपातनमिति बोध्यम् ॥

योगविभागेनेति । (कै)

विनिगमनाविरहाद् [2]"ब्रह्मभ्रूण" इत्यादाविवोभयतो नियम इत्यन्ये ॥ भाष्ये

---

१ क्षिज्योरेवैच इति । भा ॥

२ ब्रह्मभ्रूणवृत्रेषु क्विप् । अ ३ । पा २ । सू ८७ ॥

तुल्यजातीयस्येति। (भा)

अन्यथा यि प्रत्यय इति विधिर्वैयर्थ्यं स्यादिति भावः। तच्च यद्येवेन तर्हि [१]ऐकारे आयादेशः स्यादत आह

कण्ठ्येति॥ (कै)

भाष्ये एकारग्रहणमुपलक्षणमिति भावः॥ एतदनभिज्ञः शङ्कते भाष्ये

रार्यमिच्छतीति॥ (भा)

तदाह

एकारस्यैवेति। (कै)

एकारस्य तालव्यत्वमेवेति भाष्याशयः॥

क्यजन्तेति। (कै)

"रा" रैशब्दः "यि" यकारादिप्रत्ययः इति भाष्यार्थ इति-भावः॥ भाष्ये विसर्गरहित एव पाठः। एतेन रायिरित्ययुक्तम् आलस्य दुर्लभत्वाद् रैशब्दात्त्विक् दुर्लभ इत्यपास्तम्॥

नास्ति प्रयोग इति। कै

अनभिधानादिति भावः॥ [२]"क्यच् तु" इत्यादिः "वचनाद्" इत्यन्तो ग्रन्थस्तस्यैकीयमतत्वात्। अत एव [३]"नः क्ये" इति सूत्रे "वाच्यति" इति भाष्ये प्रयुक्तम्॥

---

१ एकारे। क। इ॥

२ "क्यच्" त्वैकारान्तान्नास्ति गोसमानाक्षरनान्तादिति वचनात्॥

३ अ १। पा ४। सू १५॥ वाच्यति। स्रुच्यति॥

अन्ये त्विति। (कै)

अचारुचि बीजन्तु "रायमिच्छती"ति भाष्यप्रयोगविरोधः। नहि विग्रहस्कन्द इति बोध्यम्। भाष्ये "यि" इत्यस्य वैयर्थ्याच्च। भाष्ये गोहः सम्बन्धिन ऊकारस्य याऽन्तरतमा प्रकृतिरित्यन्वयः॥

स्थानिन्युपसंहियत इति। (कै)

एवं च "गोह" इति गोहावयवलाक्षणिकमूकारान्तरतमस्य गोहावयवस्योदित्यर्थ इति भावः॥ ननूपधाग्रहणाकरणलाघवे दर्शिते [१]"क्रियत" इत्युत्तरमसङ्गतमत आह

अन्यथेति। (कै)

परत्वाद् [२]"अलोऽन्तस्य" इत्येव व्यवस्थापकं स्यादित्यर्थः। एवं च पचद्वयेऽप्यावश्यकं तदिति भावः॥ ननु तग्रहणाभावे "चरितम्" इत्यादावपि रेफाऽनन्तरा निष्ठेति नत्वं स्यादत आह

चरितमिति॥ (कै)

[३]"रदाभ्याम्" इत्यस्य प्रधानविशेषणताया न्याय्यतया परिभाषासंस्कृते लक्ष्यसंस्कारके वाक्ये रेफदकाराभ्यां परस्य निष्ठासम्बन्धिनोऽन्तरतमस्य नकारादेश इत्यर्थ इति भावः॥ [४]"आदेः परस्य" "स्थानेऽन्तरतम" इत्याभ्यामादेरन्तरतमस्य न इत्यर्थे दकारस्याऽन्तरतमत्वाभावेन तकारस्य आदित्वाभावेनाप्राप्तिरिति परे॥ पचान्तरेऽपि तुल्यत्वान्न गौरवमित्याह

---

१ क्रियते एतन्न्यास एव। भा॥ २ अ १। पा १। सू ५२॥
३ अ ८। पा २। सू ४२॥ ४ अ १। पा १। सू ५४॥

अन्यथेति ॥ (कै)

दकारस्य नत्वं स्यादिति। (कै)

अनया परिभाषयेति भावः॥ वस्तुतस्तु "आदेः परस्य" इत्यनेनाऽन्त्यस्याऽप्राप्तिः। सूत्रं तु उभयाविरोधेन भिन्नमित्यादौ चरितार्थमित्यत्र प्रयोगे न स्यादेव नत्वमित्युभाभ्यामपि तग्रहणं कर्त्तव्यमिति भाष्यतात्पर्य्यम्। एवं च प्रथमान्तच्छेदो निर्दोषः। सप्तम्यन्तच्छेदस्तु दुष्ट एव। अत एव [1]"न भूसुधियोः" इत्यादि चरितार्थम्॥ "नृनरयोर्वृद्धिश्च" इति [2]गार्ङ्गरवाद्यन्तर्गणसूत्रं यद्यार्षं तदा नरः अ इति व्याख्यानादाद्याकारस्यैव वृद्धिरिति न तत्र दोषः। तत्र नृनरयोरित्यावर्त्तते एकत्र पञ्चम्यर्थे षष्ठी पृथगपि वा तौ गणे पठ्येते इति बोध्यम्॥

अथेति। (कै)

वाक्यभेदाऽभेदाभ्यां पक्षद्वयभेद इति बोध्यम्। तत्र द्वितीयः सिद्धान्तो भविष्यति॥

भिन्नरूप इति। (कै)

पर्य्यायो यद्यपि भिन्नरूपस्तदर्थप्रत्यायकश्च तथापि विनिगमकाऽभावादुभयोः स्थानित्वमादेशत्वं च वाच्यम्। तथाच सूत्रमनारभ्यमं स्यादिति भावः। शास्त्रप्रवृत्तौ हेतुर्वचनसामर्थ्यम्। सदृशादेशे हेतुः

शब्देति ॥ (कै)

---

१ अ ६। पा ४। सू ८५॥ २ अ ४। पा १। सू ७६॥

भाष्ये

[1]यदि चैवमिति । (भा)

स्यान्यपेक्षयाऽऽदेशे यच्च वैरूप्यं प्रसक्तं तच्चैष दोष इत्यर्थः ॥

नहि तदेति । (कै)

आदेशरूपमस्यैव तेन षत्वविधानादिति भावः ॥

यदा त्विति । (कै)

तद्ग्रनयन् भाष्यकृदच्यति

इमे वर्णा (भा)

इत्यादि ॥ नन्वस्य निर्वर्त्तकत्वे आर्द्धधातुकेऽप्यस्त्यादीनामस्त्याद्या-देशाः स्युरिति कुतो नोक्तं किं चानेन सिद्धे तद्ग्रर्थं चेत्यत आह

अस्तेरिति । (कै)

विद्यतिनिवृत्तिस्तत्फलमिति भावः । सदृशाऽऽदेशविषयेऽपि दोषमाह भाष्ये

अपि च इष्टेति ॥ (भा)

ननु सदृशाऽऽदेशे कथमिष्टव्यवस्थाऽसिद्धिरत आह

पुनरिति ॥ (कै)

ननु "लक्ष्ये लक्षणस्य" इति न्यायविरोधोऽत आह

प्रयोजनमिति । (कै)

सप्रयोजनशास्त्रप्रवृत्तौ हि प्रथमप्रवृत्त्यैव प्रयोजननिष्पत्तेर्न

---

१ यदि चैवं क्वचिद्वैरूप्यं तच्च दोषः स्यात् । भा ॥

द्वितीयादिप्रवृत्तिरिति तद्बीजं न चेदं प्रकृते इतिभावः ॥ भाष्ये "व्यवस्था" इत्यस्य सापेक्षत्वादाह

साधुत्वस्येति। (कै)

परिनिष्ठितत्वव्याप्यत्वात् साधुत्वस्येति भावः। एवं च दोषान्तमेव शास्त्रं स्यादिति तात्पर्यम् ॥

निर्वृत्तेष्टिति। (कै)

अन्येन निर्वृत्तानां मध्येऽनेनान्तरतमस्यैव साधुत्वप्रतिपत्तिरिति भाष्यार्थ इतिभावः ॥

अभिमतस्येति। (कै)

शास्त्रप्रामाण्यादुभयोरपि पाक्षिकसाधुत्वाऽऽपत्तेरितिभावः ॥ दीर्घादेरिष्टा व्यवस्था न भविष्यतीत्यत आह

[1]अक इति। (कै)

एकप्रमाणबोधितस्य सामान्यविशेषभावाभावेन प्रमाणान्तरेण आत्यन्तिको निरासोऽशक्यः कर्तुमिति भावः ॥ ननु शास्त्रप्रामाण्यादुभयोरपि साधुत्वे इदं व्यर्थं स्यादिति पृच्छति

इदमिदानीमिति ॥ (भा)

उत्तरयति

अनर्थकमिति ॥ (भा)

भुक्त्वा इति। (भा)

निरनुस्वारः पाठः ॥ आनर्थक्यं परिहरति

---

१ अकः सवर्णे दीर्घः। अ ६। पा १। सू १०१ ॥

उक्तं वेति ॥ (भा)

द्वितीयपक्षाङ्गेदमुपपादयति

एकवाक्यतेति । (कै)

एवं चेतरस्याविधानमेवेतीष्टव्यवस्थासिद्धिरिति भावः ॥ परे तु उत्पन्नानामनेन निवृत्तिर्लुगादिनेवेति भावः ॥ एतदाशयमजानान आह

[1]निर्वृत्तिर्न सिद्ध्यतीति ॥ (भा)

तदभ्युपेत्य समाधत्ते

उक्तं वेति । (भा)

भुक्तवतो भोजनफलतृप्तेर्जातत्वान्निषेधस्य वैयर्थ्येऽपि शास्त्रे [2]"वृद्धिरादैच्" सूत्रभाष्योक्तशास्त्रप्रामाण्यालुगादिनेव जातनिवृत्तिरिति वाशब्देन सूचितमित्याहुः ॥

आत्मानमिति । (कै)

[3]"अनश्च" इति टच् ॥

स्थान्यात्मन इति । (कै)

स्थानिरूपपदार्थस्येत्यर्थः ॥ नन्वन्तरतमशब्दस्य सदृशार्थकत्वेन [4]"तुल्यास्य प्रयत्नम्" इत्यत्रैव "सम्बन्धिशब्दत्वाद्" इति कुतो नोक्तमत आह

---

१ निर्वृत्तप्रतिपत्तौ निर्वृत्तिर्नसिध्यति । उक्तं भाष्ये ॥

२ अ १ । पा १ । सू १ ॥ ३ अ ५ । पा ४ । सू १०८ ॥

४ अ १ । पा १ । सू ९ ॥

तुल्येति ॥ (कै)

प्रत्यात्मं चासते इति। (भा)

स्वस्वसमाजेष्वेवासत इत्यर्थः ॥

कस्यां चिदिति। (कै)

धर्मनिर्णयादिक्रियायामित्यर्थः ॥ अर्थकृतान्तर्ये सति तदेव प्रयोजकमित्याह

गुणेत्यादि। (कै)

पाण्डुत्वं गुणः। कृशत्वादि प्रमाणम् ॥

विद्यादीति। (कै)

आदिनोत्सवाग्रनाद्यर्थित्वब्राह्मणत्वादिजातिधनादिसंग्रहः। एवं च [१]"अन्तरतमो भवतीति" [२]"यत्रानेकविधमिति" च न्यायसिद्धमिति भावः ॥ दृष्टान्ते विवक्षितार्थमाह

संकीर्णानामिति। (कै)

भाष्ये "प्रसवो" वत्सः "तेन सह" स्वस्वप्रसवेन सह "शेरते" इति शेतिः स्थितौ ॥

एवं चोदनायामिति। (कै)

अनया रीत्या विधिशास्त्रेऽपीत्यर्थः ॥ "युक्तक" शब्दो युग्म-

---

१ अन्तरतम आदेशो भवतीति। भा ॥

२ यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। परिभाषेन्दु-१३ ॥

वाची ॥ "संघुष्टक" शब्दस्तत्तद्युगवहनादिनाऽत्यन्तपरिचितवाची अनेनापि ग्रन्थेन यत्राऽनेकविधमित्यर्थः साधित इत्याशः ॥

सादृश्यादिति । (कै)

तत्तद्युगवहनाद्यत्र सादृश्यम् ॥

अन्तरिक्ष इति । (कै)

अन्तरिक्षे भवा आन्तरिक्ष्याः । अत एव निदाघे निर्गि निरावरणे ग्रयानानां गैत्योपलम्भः । तस्यैव च रविकिरणसम्पर्केण मेघरूपतया वायुयोगादृष्टिः । आन्तरिक्षीणामपाम्परम्परया धूमो विकार इति दर्शयति

तद्विकारः सर्वा इति ॥ (कै)

सूर्य्यविकार इति । (कै)

अत एव दावाग्नेर्मध्याह्नादौ सूर्य्यकरसम्पर्कात् क्रौर्य्यातिशयो दृश्यते ॥

तदनाश्रयेणेति । (कै)

मन्दमध्वर्युर्यमित्यर्थः ॥ ननु नार्द्धमाचिक[1] इत्यत आह ।

इदमेवेति । (कै)

[2]"कार्य्याः शब्दा" इतिदर्शने प्रमाणादिना तत्तदन्तरतम-

---

१ ननु नार्द्धमाचिक इतिवत आह । क । ग । इ ॥

२ एवं तर्हि भवति वै किंचिदाचार्य्याः कार्य्यवद्बुद्धिं कृत्वा पठन्ति कार्य्याः शब्दा इति (२ । १ । ६९) ॥

वर्णनिर्वर्त्तकमित्यर्थः । एवं च लोकवेदयोरभावेऽपि एतच्छास्त्रसिद्ध एव स इति भावः ॥ यदुक्तमिदमेवेति तत्राह

नित्या इति ॥ (कै)

निवृत्तिपक्षेऽपीति । (कै)

"शास्त्रकार्य्याः शब्दा" इति दर्शनेऽपीत्यर्थः ॥

उच्चारणस्येति । (कै)

तस्य लोकाधीनत्वादिति भावः ॥ इदमस्त्रिमाचिकत्वेनाऽर्द्धर्चतीयमाचिक इत्ययुक्तमत आह

अत्वेति । (कै)

परत्वादत्वेऽन्तरङ्गत्वादेकादेश इति भावः ॥

प्लुताप्लुतेति । (कै)

तादृशस्थले हि सपादसप्ताध्यायीस्थेन प्लुतविधौ त्रिपादीस्थप्लुतस्याऽसिद्धत्वात्तद्विषयेऽप्यनेनैव प्लुतविधौ तदंशेऽनुवादत्वमन्यांशे विधित्वमिति शास्त्रवैरूप्यापत्तिस्तद्बीजम् । शास्त्रं त्वप्लुतविधानेन चरितार्थमिति । प्लुतमात्रविधाने तु तद्विषयकलक्षणवैयर्थ्यापत्त्यांशेऽनुवादत्वकल्पना सोढ़व्यैव । सामर्थ्येनाऽन्तरतमपरिभाषाबाधकल्पनापेक्षयाऽनुवादत्वस्य युक्तत्वाच्चेति भावः ॥

संज्ञा चेति । (कै)

[1]कार्यकालपक्षेऽपि यथा भाव्यमानत्वाभावस्तथोपपादितं वृद्धिसंज्ञासूत्रे ॥

---

१ कार्यकालं संज्ञापरिभाषम् । परिभाषेन्दु-३ ॥

प्रत्याहार इति। (कै)

वार्त्तिके गुणवृद्ध्योर्ज्भावेष्विति द्वन्द्वो न तु कर्मधारयो भाष्यविरोधादिति भावः॥

तच्च हीति। (कै)

प्रमाणत आन्तर्य्यादिति भावः॥ नन्वेवं ह्रस्वे सर्वगुणप्रसङ्गस्याऽनुपपादनादृवर्णमात्रे सर्वप्रसङ्ग इत्यनुपपन्नमत आह

समुदायापेक्षयेति। (कै)

ऋवर्णीयह्रस्वादिसमुदायापेक्षयेत्यर्थः॥

गुणवृद्धिशास्त्रस्येति। (कै)

प्रतिलक्ष्यं लक्षणभेदादृवर्णविषयगुणादिशास्त्रस्येत्यर्थः। अङ्गान्तस्येक ऋवर्णस्य रपरोऽणूरूपो गुण इति वाक्यार्थ इति भावः। ऋश्रुतेरित्यनेनैकदेशद्वारा स्थानत आन्तर्यमुक्तम्॥

ऋवर्णस्येति। (कै)

ऋवर्णान्ताङ्गस्येत्यर्थः॥

सर्वादेशाविति। (कै)

तच्चेऽपि समुदायान्तवर्त्तित्वादृवर्णस्य तदादेशत्वमपि खट्वर्श्य इत्यादाविव वक्तुं शक्यमिति भावः॥

पूर्वमेवेति। (कै)

अन्यथा ऋवर्णस्थानिकत्वाऽभावाद्रपरत्वमेव न स्यात्। न च समुदायान्तःपाति ऋकाराश्रयेण रपरत्वम्। प्रत्यये ऋवर्णस्थानित्वे

चरितार्थस्याऽनुमानिके प्रवृत्त्ययोगात्। खट्वर्ग्य इत्यादौ तु पूर्व-परयोरित्यधिकारात् प्रत्यक्षमेव स्थानित्वमिति भावः॥

पूर्वप्रवृत्तमिति। (कै)

उपजीव्यं चेत्यपि बोध्यम्॥ "न बाधत" इत्यत्र "[1]अनेकाल्-शित् सर्वस्य" इति सूत्रं कर्त्तृ। रेफवतो रेफवानन्तरतम एवेति "अथवा" इत्ययुक्तमत आह

निर्वृत्तस्येति॥ (कै)

परिग्रहाच्चेति। (कै)

[2]"पादद्न्त" इत्यादौ स्थान्यादेशभावमते वर्णसाम्यकृतस्येति भावः। सदृशसम्बन्ध्यभावकत्वमुभयोः साधारणधर्मरूपं सादृश्य-मिति तात्पर्य्यम्॥

यत्नस्येति। (कै)

परिहारान्तराभिधानरूपस्येत्यर्थः॥

स्थानकृतमिति। (कै)

"आन्तर्य्यमि"तिभाष्यस्य स्थानकृतान्तरतमाभाव इत्यर्थः॥

नष्टाऽश्वदग्धरथवदिति। (भा)

बकुब्रीहिगर्भद्वन्द्वाद् वतिः॥ पूर्वोक्तेनाऽथवेत्यनेन पौनरुक्त्य-मपरिहरति

यदेति॥ (कै)

केचित्तु तत्प्रत्याख्यानेऽपि लोकन्यायेन सदृशचयादेश इत्यर्थः

---

१ अ १। पा १। सू ५५॥ २ अ ६। पा १। सू ६३॥

साधितो भगवतेति प्रत्याख्यानाप्रत्याख्यानयोः को विशेषस्तस्मादनान्तर्य्यस्याऽभावरूपस्य सादृश्यत्वानङ्गीकारेऽप्याह

नष्टाश्वेति। (भा)

ऋवर्णस्य स्थानित्वेनाऽवर्णस्यादेशत्वेन ग्रहणसामर्थ्यादसादृश्येऽपि स्थान्यादेशभावो यथा नष्टाश्वदग्धरथयोरत्यन्तभिन्नयोरपि असदृशयोरपि सम्बयोग इति तात्पर्य्यमित्याहुः॥ "प्रधानत्वं" भूयस्त्वेन॥ न्यायस्तर्हि कैत्यत आह

ह्रस्वेति॥ (कै)

उरण् रपरः।१।१।५१॥

भाष्ये

उरण् रपरवचनमिति। (भा)

सूत्रस्थविसर्गप्राग्भागानुकरणेन षष्ठीसमासः॥ नन्वन्यशब्देन न स्थानी आदेशस्य स्थानिनिवर्त्तकत्वस्वभावत्वाद् न स्थानिव्यतिरिक्त उरण् इत्येतावतः स्थानिव्यतिरिक्तनिवर्त्तने सामर्थ्याभावादत आह

षष्ठीति। (कै)

यत्र षष्ठ्या ऋवर्णस्यादेशप्रसक्तिस्तत्रेत्यर्थः॥ स्वातन्त्र्येणाऽस्य विधायकत्वं तु "[1]इको गुणवृद्धी" इत्यत्र भाष्ये एव निराकृतम्।

---

१ अ १। पा १। सू ३॥

तच्च यद्यन्यनिवृत्त्यर्थत्वं नियामकत्वेन तदा "अथ मतमेतद्" इति वक्ष्यमाणस्य विशेषो न स्यादत आनुषङ्गिकं तदित्याह

तच्चेति॥ (कै)

अपूर्व इति। (कै)

वाक्यभेदेन "[1]अनित्यादिः" उदात्तो भवति ऋवर्णस्य ल्वण् भवति स च रपर इत्यर्थ इति भावः॥

तच्च सामर्थ्यादिति। (कै)

विशेषविधेः सामान्यविधिबाधकत्वेनेत्यर्थो न तु वाच्यवृत्त्याऽस्य नियमपरत्वमिति भावः॥

स चोदात्तादिगुण इति। (कै)

अत्र पक्षेऽनन्तरस्येति न्यायेनाऽन्तरतमपरिभाषाया अनेन बाध इति भावः॥

न वेति। (कै)

यत्रोपस्थितिस्तद्विधेयस्य बाध इत्यभिमानः॥ भाष्ये "क्तिः" नित्स्वरेणाद्युदात्तः। "क्तम्" इत्यत्र प्रत्ययस्वरेणान्तोदात्तशेषनिघातेन ककारोऽनुदात्तः। प्रकृते "[2]गतिरनन्तर" इति पूर्वपदप्रकृतिस्वरे शेषनिघाते "[3]उदात्तादनुदात्तस्य" इति स्वरितत्वम्। "[4]उच्चैरुदात्त" इत्यादिषु षष्ठ्यन्तम् अत्र इत्यनुवर्त्तते इति पक्षे "अनित्यादिः" इत्यादावस्य इत्युपस्थितेः षष्ठीभङ्गावाद् उरण्

---

१ अ ६। पा १। सू १९७॥ २ अ ६। पा २। सू ४९॥
३ अ ८। पा ४। सू ६६। ४ अ १। पा २। सू २९॥

इत्यस्योपस्थानमिति द्रष्टव्यम्॥ नियमपक्षे वक्ष्यमाणदोषमनाघा-
ङ्क्य दर्शयति

प्रतिपदेति॥ (कै)

तेषामिति। (कै)

प्रत्यासत्त्योरण् इत्यनेन विधीयमानस्याणो विधीयमान-
मिति शेषः॥

दुर्लभ इति। (कै)

ह्रस्वस्य गुणाकारलाभेऽपि दीर्घस्याऽकारगुणालाभः। वृद्धिस्तु
नियमेन अण् न लभ्यत इत्यर्थः। "कर्त्ते"त्याद्युदाहरणं भाष्ये
दीर्घान्तस्याऽप्युपलक्षणम्॥ "किम्" इत्यस्य विशेष्यमाह

कारणमिति॥ (कै)

भाष्ये "असवर्णे" सदृशाभावे इत्यर्थः॥ ननु नियामकाभावे
कदाचिदवर्णस्यापि प्रतिपत्तौ कथमवर्णाऽप्रतिपत्तिरत आह

ततश्चेति॥ (कै)

दोषपरिहारायाद्येवाऽन्यनिवृत्त्यर्थमित्यस्य नियमपरतया
व्याख्यानमाशङ्क्य दूषयति भाष्ये

अथ मतमिति। (भा)

एतद्वक्ष्यमाणं नियमरूपत्वमन्यनिवृत्त्यर्थमिति वदतो मतं
सम्मतं विवक्षितमित्यर्थः॥

सिद्धा पूर्वस्मिन्निति। (भा)

अन्यनिवृत्त्यर्थमिति पक्षे इत्यर्थः॥

स चेति । (कै)

वाक्यभेदेनेत्यर्थः ॥ न चैवमिकारोकारावपि स्यातामत आह

न च गुणेति ॥ (कै)

भवानिति । (कै)

नियमपक्षवादीत्यर्थः ॥

स एवेति । (कै)

विचारक एवेत्यर्थः ॥ शङ्कते भाष्ये

यद्यप्यणोऽपीति ॥ (भा)

परिहरति

कुतो न्विति ॥ (भा)

तमब्ग्रहणमहितस्याप्यवकाशप्रदर्शनाय "[1]अयोह" इत्युक्तम् ॥

उरण् रपर इत्यस्यावकाश इति । (कै)

गुणविधौ "स्थानेऽन्तरतम"परिभाषानुपस्थितिः । ऋवर्ण-समुदायान्तरतमगुणाभावादिति भावः । यद्यपि भाष्याद् विनिगमनाभावो लभ्यते । तथापि "एष दोषो जायते" इत्युत्तरग्रन्थासङ्गतेर्विनिगमकं प्रदर्श्यान्तरतमपरिभाषाऽप्रवृत्तिमुपपादयति

परत्वादिति ॥ (कै)

[2]भाष्ये

---

१ अ ८। पा ४। सू ६२ ॥

२ ननु प्रतिपदविहिता अप्यण एवेति कुतो रपरत्वाप्राप्तिरत आह यच्च ह्रीति ॥ ग्रोयङीति लत्वविधानादाद्यच्या तेषामपि परत्वमिति चेत् ऋकारान्तर्गते रेफस्य लत्वार्थं तत् स्यादिति न दोषः । क । ग । इ ॥

ये चाप्येते इति । (भा)

बहुवचनेन "[1]आप्ज्ञप्यृधाम्" इति ईत्वसंग्रहः ॥

विधीति । (कै)

ऋवर्णस्थानिकाऽण्विधिवाक्यैरित्यर्थः ॥

एकवाक्यतायामिति । (कै)

वाक्यैकवाक्यतायामित्यर्थः ॥ ननु "उर्" इति षष्ठ्या स्थानेयोगत्वस्य लाभः स्यादत आह

नहीति । (भा)

एवंचायमनुवाद इति भावः ॥

विध्यङ्गेति । (कै)

विधेयेन साचाद् यत्र सम्बन्धस्तत्र परिभाषेत्यर्थः ॥ [2]"उदात्तस्वरितयोर्यणः" "[3]लः परस्मैपदम्" इत्यादावनुवादेऽप्यस्याः प्रवृत्तेः "यद्येवम्" इत्यादिभाष्यमेकदेशिनोरुक्तिरिति बोध्यम् ॥

उः समीप इति । (कै)

तथा च ह्रतौय इत्यादावण्णो रपरत्वप्राप्तिरित्यर्थः । [4]सामीप्ये च षष्ठी व्यवहितेऽपीति भावः ॥

स्थाने य आदेशोऽणिति । (कै)

---

१ अ ७ । पा ४ । सू ५५ ॥

२ अ ८ । पा २ । सू ४ ॥

३ अ १ । पा ४ । सू ९९ ॥

४ सामीप्यंचेषद्व्यवहितेऽपीति भावः । क । ग । इ ॥

अनुवर्तमानस्थाने ग्रहणमुरित्यस्य सम्बन्धिग्रब्दत्वात्तत्रैव सम्बध्येतेत्यर्थः॥ नन्वेवमादेशः स्थानेन विशेषित एवेति "आदेशोऽविशेषित" इति भाष्याऽसंगतिरित्यत आह

प्रसज्यमानत्वेनेति॥ (कै)

अथवा स्थानेति। (कै)

स्थानग्रब्दस्य प्राधान्यात् "रपर" इत्यनेन सम्बन्ध इति भावः॥

तत इति। (कै)

अणः स्थाने पदार्थेनाविशेषणादित्यर्थः। एवंच नाऽऽदेशान्तराणां बाधकोऽण् विधीयते नाऽपि नियमो नाऽपि विहितस्य रपरत्वं प्रसज्यमानत्वेन विशेषणात् किन्तु तत्तद्विधिभिर्वाक्यैकवाक्यतैवाऽस्येति बोध्यत इति बोध्यम्॥

अथवेति। (कै)

स्थानपदेन प्रसङ्गकालो लक्ष्यते इति भावः॥

ऋकार एवेति। (कै)

स्थानतः प्रमाणतः स्वरूपतश्च सदृग्रत्वादिति भावः॥ ननु वार्त्तिकोक्तरोरिविधोर्ज्ञातत्वात्तस्य चोपलक्षणत्वे प्रामाणाभावात् "के पुनरि"ति प्रश्नानुपपत्तिरत आह

बहुवचनेति॥ (कै)

"सौधातकौ" "[1]सुधातुरकङ्च" इति "इञ्"। "पैढ्यसैन्ये" ढकि लोपस्तत एव ढक् च॥ ननु लोपस्य रपरत्वे तं विनापि यणादेशेन तत्साध्यरूपसिद्धिरत आह

---

१ अ ४। पा १। सू ९७॥

लोपेति । (भा)

रपरत्वाभिधानमुखेन सर्वादेशत्वमेव लोपस्याभिधित्सितमिति भावः । यदि सर्वादेशो लोपस्तदा उः स्थाने नेति कथं रपरत्वमितीदं चिन्त्यम् । तस्माल्लोपविधिवैयर्थ्यापादनमेव दोष इति तत्त्वम् । आनङ्नञौ "[1]आनङृतो द्वन्द्वे" "[2]ऋदुशनेति विहितौ ॥

रेफस्येति । (कै)

झल्ग्रहणापकर्षेणाद्यणः प्रतिषेधारम्भाच्च चिन्त्यमिदम् । तस्माद्रेफग्रहणमेव दोषोऽत्रेति बोध्यम् ॥

समुदायस्येति । (कै)

द्वन्द्वस्य सत्त्वादिति भावः ॥

उद्भूतेति । (कै)

अत एव द्विवचननिर्देशः । तत्सामर्थ्यादेव प्रत्येकं स्थानित्वबुद्धिरिति भावः ॥ नन्ववयवभेदस्योद्भूतत्वविवक्षा नाम तद्गतसंख्यायाः समुदाये आरोपो नैतावता प्रत्येकं स्थानित्वलाभोऽत आह

अवयवावेव चेति । (कै)

इतरेतरयोग इति शेषः । एवंच तत्र समुदायस्यावयवाभेदेन बोधनाद् द्विवचनेन प्रत्येकं तयोः स्थानित्वलाभोऽयमेव चोद्भूतावयवभेदः समुदाय इत्यस्यार्थ इति भावः ॥ भाष्येऽग्रहीताभिप्रायः समुदायस्याऽतिरिक्तस्य स्थानित्वेऽपि तदन्तर्गतावयवस्याऽपि स्थानित्वमादाय कस्यानिकत्वमनेनोक्तमित्यभिप्रायवानाह

---

१ अ ६ । पा ३ । सू २५ ॥ २ अ ७ । पा १ । सू ९४ ॥

अवयवग्रहणात्सिद्धमिति चेदिति ॥ (भा)

रान्तस्येति। (भा)

रान्तत्वस्येत्यर्थः ॥

ऋवर्णान्तेति। (भा)

शब्दशास्त्रप्रस्तावात् शब्दरूपं विशेष्यमादाय तदन्तविधिरिति भावः ॥ नन्विकाऽङ्गे विशेष्यमाणे तदन्तविधेरृवर्णान्तस्य गुणेन भाव्यमत आह

अङ्गस्येति षष्ठीति। (कै)

इगन्ताङ्गान्त्यस्य गुण इति वाक्यार्थ इति भावः ॥ भाष्ये लक्ष्याभिद्धिदोष ऋवर्णान्तस्येत्यर्थे उक्तः। स्वयं तदर्थाऽसम्भवमप्याह

नचेहेति ॥ (कै)

भूतानुवादादिति। (कै)

एवं चानुवादे परिभाषाया इव संज्ञाया अप्यप्रवृत्तिः। यद्वा समानविभक्त्यन्तविशेष्यरहितभूतानुवादादित्यर्थः। यत्र हि साक्षादर्थाद्वा विशेषणसमानाधिकरणं विशेष्यमुपादीयते तत्रैव वर्णग्रहणे तदन्तविधिः। गमकं विना शब्दरूपविशेष्यमादाय तु न तदन्तविधिरिति भावः ॥

न च प्रदेशेष्विति। (कै)

इह तदन्तविध्यभावेऽपि यदि प्रदेशेषु ऋवर्णान्तस्य षष्ठीनिर्देशेन स्थानित्वं स्यात् ततस्तदनुरोधेनाऽनुवादेऽप्येकदेशद्वारा

ऋवर्णान्तं ग्राह्यं तदपि नास्तीति भावः। इदं चिन्त्यम्। "[1]वृद्धि-र्यस्य" इत्यादौ "[2]ईदूदेद्विवचनम्" इत्यादौ चानुवादेऽपि संज्ञा-प्रवृत्तेः। वर्णविधौ च सर्वचेति च शब्दरूपविशेष्यमादाय तदन्त-विधौ गमकमतो भाष्योक्त एव दोषः॥ भाष्ये

अर्थवतेति। (भा)

इदमसहायत्वोपलक्षणमत एव कुरुते इत्यादौ अनर्थकेनाऽपि मः। तत्र हि स टिसंज्ञोपयोगिसहायरहित एवेति दिक्॥ भाष्ये

इह चेति। (भा)

एकदेशस्योपसंख्यानमित्यौपसंख्यानिकरपरत्वप्रतिषेधश्च वक्तव्य इत्यर्थः॥ मातुरित्यादौ तदुपसंख्यानातिव्याप्तेरिति भावः॥

मातूरितीति। (कै)

उः रपर इति पूर्वोक्तभाष्यप्रयोगविरोधाद् "[3]ऋत उद्" इति तपरत्वान्मातूरित्यादौ न दीर्घ इत्यपास्तं वेदितव्यम्॥ उक्तार्थे गमकमाह

अत एवेति। (कै)

पंचम्यन्तात् तसिल्यर्थाऽसंगतेराह

तृतीयान्तादिति॥ (कै)

समुदायस्येति। (कै)

प्रत्येकमादेशत्वे प्रमाणाभावादित्यर्थः॥ भाष्ये

---

१ अ १। पा १। सू ७३॥ २ अ १। पा १। सू ११॥
३ अ ६। पा १। सू १११॥

रात्सस्येति। (पा)

सलोपे रुत्वस्याऽसिद्धत्वादिति भावः॥

[1]असित्ययमिति। (कै)

प्रत्ययरूपविसर्गभिन्नस्येत्यर्थ इति भावः॥

अकारोऽपीति। (कै)

सूत्रस्थप्रत्ययशब्दस्तदवयवे लाक्षणिक इति भावः॥

उत्वे च कृत इति। (कै)

न चैकादेशस्य परादिवत्त्वेनोरसित्यस्य प्रत्ययतया लोपे एकदेशविकृतन्यायेनोरित्यस्य प्रत्ययतया विसर्गस्य प्रत्ययावयवत्वमस्त्येवेति वाच्यम्। चिपाद्या असिद्धत्वेन तचाऽन्तादिवद्भावाऽप्रवृत्तेः। स्थानिवत्त्वेन त्वनिर्वाहः। उपात्तस्य स्थानिनोऽकारस्य प्रत्ययत्वाभावात् "सर्वे सर्वपदादेशा" इत्यनेन तु माद्द असित्यस्य स्थानित्वेऽपि असित्यस्य स्थानित्वालाभात्। भाष्ये "[2]लुप्यतेऽत्र प्रत्ययविसर्जनीय" इति पाठे योऽत्र प्रत्ययस्थानिकत्वेन तवाऽभिमतो विसर्जनीयः स लुप्यते न दृश्यते स्थानिनः प्रत्ययस्यैव लोपादित्यर्थः॥

एवं तर्हि भ्रातुष्पुत्रेति। (भा)

चिपाद्यामयन्तादिवद्भावप्रवृत्तिज्ञापनद्वारेति गूढोऽभिसन्धिः॥

---

१ असिप्रत्ययमिति। क॥

२ पुण्यपत्तनस्थराजकीयदक्षिणविद्यालयस्थभाष्यपुस्तके इंगलण्डीयभाष्यपुस्तके च "लुप्यते तत्र प्रत्ययो रात्सस्येति" इति पाठोऽस्ति। वंगीयैसियातिक्समाजस्थभाष्यपुस्तके "लुप्यतेऽत्र प्रत्ययविसर्जनीयो रात्सस्येति"। इति पाठोऽस्ति॥

कर्मधारये निमित्तपदवैयर्थ्यमिति बहुव्रीहिमेकादेशपदे लक्षणं च दर्शयति

एकादेशशास्त्रमिति ॥ (कै)

यद्यपीति । (कै)

तथा च तस्यैव विशेषणं स्यादिति भावः ॥

प्रधान्यादिति ।(कै)

रपरशब्दतात्पर्य्यविषयत्वादित्यर्थः । एवंच पूर्वान्तावयवभूत-रेफपरोऽणित्यर्थः । सूत्रे रपर इति समासस्य सौत्रत्वात् साधुः ॥ नन्वरारादिरूपेण विधानात् कथमभक्तत्वादिशङ्क्येत्यत आह

यद्यपीति ॥ (कै)

अविधानादिति । (कै)

अनुच्चारणादित्यर्थः ॥

तात्पर्य्येति । (कै)

प्राप्ताप्राप्तविवेकन्यायेनेत्यर्थः ॥

केवलेति । (कै)

रेफमात्रविधौ सूत्रतात्पर्य्यादिति भावः ॥ यत्तु अयमपि विचारो भूतस्याणो रपरत्वमिति पक्षे नष्टाश्वरथन्यायनाऽनान्तर्य्य-मेवान्तर्य्यमिति ऋकारस्याकाराकारावेव गुणवृद्धी भविष्यतः । अरादिरूपेण विधानमिति पक्षे तु आनङादौ नकारविषयो यथा न विचारस्तथाऽत्रापीति तत्त्वमिति तत्तु प्रकृतसूत्रे तस्य पक्षस्याश्रितत्वादयुक्तम् ॥ वार्त्तिके प्रतिषेधोऽभावो निवर्त्तनं च आद्ये स्यादिति शेषः ॥

[1]द्वितीये वक्तव्य इति।

"गृप्रोः" क्विपि "गीः" "पूः" "[2]ऋत इत्" "[3]उदोष्ठ्य" इतीत्त्वोत्त्वे॥ भाष्ये

पदमिति। (भा)

पदस्येत्यनुवर्त्तमानमित्यर्थः॥

अनन्तरयोगेति। (भा)

अनन्तरशब्दोऽव्यवहितवाची॥

स्वरविधाविति। (भा)

यद्यपि हल् स्वरप्राप्तौ स्वरोद्देश्यकविधौ चेदम्। अत एव "[4]अचः कर्त्ते" इति सूत्रेऽच इति चरितार्थम्। तथापि तदनाश्रयेणैकदेशयुक्तिर्भाष्यमिति तत्त्वम्॥ भाष्ये "माङ्" प्रयोगोऽडभावाय। तस्मिन् "हि" अट्स्वरः स्यात्। हि प्रयोगो "[5]हि च" इति निघातनिषेधाय। "स्म" शब्दो लङ्सिद्धये॥

अभ्यासावयवस्येति। (कै)

गर्भवदनवयवस्यापि तद्ग्रहणेन ग्रहणं "तन्मध्यपतित" न्यायेन न लेतावतावयवत्वमिति भ्रमितव्यमिति भावः। यद्वा ऋवर्णान्ताभ्यासस्येत्यर्थे पूर्वेतकारस्य "हलादिः शेषेण" निवृत्तौ उरदत्वं ततः

---

१ द्वितीये वक्तव्यमिति। क। ग। इ॥

२ अ ७। पा १। सू १००॥ ३ अ ७। पा १। सू १०२॥

४ अ ६। पा १। सू १९५॥

५ अ ८। पा १। सू ३४। हि युक्तं तिङन्तं नानुदात्तम्। आ हि स्मा यात॥

पुन"र्हलादिः शेषो" न स्याद् अनवयवत्वादिति भावः । न चैवं "लक्ष्ये लक्षणस्य" इति न्यायेन पुन"र्हलादिः शेषा"नापत्तिरिति वाच्यम् । लक्ष्यभेदात् । [1]नृकुटीशब्दात्तु भवादावण् । नृपते-"[2]र्दित्यदित्यादित्य" इति ण्यः ॥ ननु रेफान्तान्न सुब्विधिरिति कथं तदन्तस्य प्रत्ययलक्षणेन पदत्वमत आह

यस्मादिति । (कै)

यस्माद् विधिस्तदृत्तिनृशब्दत्वं नाशब्दस्य स्थानिवद्भावेन तदादित्वं च रेफान्तस्य सुप्त्वं सुवन्तत्वं च प्रत्ययलक्षणेनेति भावः ॥ एकवचनान्ताऽनुदाहरणे बीजमाह

एकेति ॥ (कै)

नित्यत्वादिति । (कै)

विकरणविधौ "सार्वधातुक" इति विषयसप्तमी अन्यथा-ऽभक्तत्वेऽनन्तरसार्वधातुकाऽभावेन विकरणाप्राप्तेर्नित्यत्वं व्याहतं स्यादिति भावः ॥

नित्यत्वादिति । (कै)

तसो ङित्वादित्वस्यैव प्रवृत्तेः ॥

न प्रकल्पत इति । (कै)

नियमेन विकरणस्यैव व्यवहितपरत्वं न सिध्येदिति भावः ॥

नृकल्पेति । (कै)

नृशब्दात् कल्पः प्रत्ययः ॥

---

१ नृकुटीशब्दाद्भवादावण् । क । ग । ङ ॥

२ अ ४ । पा १ । सू ८५ ॥

पदसंज्ञेति । (कै)

"स्वादिष्वि"त्यनेन यद्यसौ कल्पशब्दावयवमस्यात् तदा स्वावयवभूतरेफान्तस्य नारित्यस्य न स प्रत्ययः परः स्वादिति भावः॥ परादिरित्यत्र परशब्देन परत्वपर्य्याप्त्यधिकरणो यावान् स सर्वोऽपि गृह्यते न तदवयवोऽपीति तात्पर्य्यम्॥ ननु प्रत्ययस्य कथं पदत्वमत आह

पदशब्देनेति । (कै)

[1]कल्पिरूपः पदसंघातः पदसमुदाय इति भाष्यार्थः। तस्मात् पचचयेऽपि विसर्जनीयप्रतिषेधस्य वक्तव्यतया नायं दोष इति भावः। वृद्धेर्वहिरङ्गाऽसिद्धत्वं तु नोक्तं चिपादीष्वेऽन्तरङ्गे तत्परिभाषाया अप्रवृत्तेः॥ भाष्ये

उपदेश इति वर्त्तते इति । (भा)

"[2]अचः कर्त्ति"त्यत्र "[3]तास्यनुदात्तेद्" इत्यत इत्यर्थः॥ भाष्ये

अथवा पुनरस्तु परादिरिति । (भा)

[4]र्ववधारणविसर्जनीयप्रतिषेधयोः कर्त्तव्यतायाः पूर्वान्तपरादिपचयोस्समत्वात् परादिपचो वा वक्तव्यः पूर्वान्तो वा इत्यत्र न विशेष इति चेत् कश्चिद् ब्रूयात् तत्राह वार्त्तिककारः "परादा-

---

१ भाष्ये "कल्पिपदसंघातभक्तः" इति पाठोऽस्ति। क्वचिद् "कल्पपदसंघातभक्त" इति पाठोऽप्यस्ति॥

२ अ ६। पा १ सू १९५॥ ३ अ ६। पा १। सू १८६॥

४ पूर्वान्ते र्ववधारणं विसर्जनीयप्रतिषेधो यक्खरश्च। वा॥

वि"तीत्यर्थः ॥ "[1]परादौ" इति वार्त्तिके पुगन्तलघूपधस्य प्रतिषेधपदेन षष्ठीतत्पुरुषो वक्तव्य इति शेषः ॥ चङुपधाह्रस्वं वक्तव्यम् अग्रे सर्वचायमेव शेषो बोध्यः ॥

उपदेश इति वर्त्तते इति । (भा)

"[2]अतो लोप" इत्यत्र "[3]अनुदात्तोपदेश" इत्यत इत्यर्थः ॥ "पररूपेण" । "[4]अतो गुण" इत्यनेन ॥

नन्विति । (कै)

"[5]आदेः परस्य" इति "[6]निर्दिश्यमान" परिभाषाबाधकमित्यभिमानः । तस्यैवायमनुपसंहार इत्युत्तरम् ॥ ननु सूत्रे उच्चारितस्य णलो नादेशः किन्तु तत्[7]प्रत्यायिताकारस्येति षष्ठीनिर्दिष्टस्यादेशा इत्ययुक्तं स्यादत आह

प्रत्याय्येति । (कै)

"निर्दिश्यमानस्य" इत्यस्य प्रतिपादितस्य इत्यर्थे तु पादन्तस्यापि पदादेशापत्तिरिति बोध्यम् ॥

यदि त्विति । (कै)

तथा तु वक्तुमशक्यम् । सर्वचादेशापत्तेरिति भावः ॥ कथं तर्हि "इडपि" इत्यादि भाष्यमत आह

---

१ परादावकारलोपौत्वं पुगन्तप्रतिषेधश्चङुपधाह्रस्वत्वमिटोऽत्यवस्थाऽभ्यासलोपोऽभ्यस्तादिस्वरो दीर्घत्वं च । वा ॥

२ अ ६ । पा ४ । सू ४८ ॥ ३ अ ६ । पा ४ । सू ३७ ॥

४ अ ६ । पा १ । सू ९७ ॥ ५ अ १ । पा १ । सू ५४ ॥

६ निर्दिश्यमानस्यादेशा भवन्ति । परिभाषा—१२ ॥

७ तत्प्रत्यापिताकारस्य । इ । तत्सुत्यापिताकारस्य । ग ॥

प्रवृत्तौ वेति। (कै)

"[1]नेड्वशी"त्यत्रोपदेश इत्यपकृष्योपदेशे वशादेरेव निषेध इति भावः॥ भाष्ये

वृत इति। (भा)

ऋवर्णान्ताभ्यामसाऽदित्यर्थे पूर्वं तलोपे पश्चाद्रेफान्तस्य लोप इति पचे इदम्। "वत्रे" इत्युदाहार्य्यम्॥

प्रकर्त्तेति। (भा)

ल्टन्॥ "एष स्वरः"। पूर्वपदप्रकृति स्वरः॥ कृदुपदेशकालिकतादिप्रत्ययप्रतीत्यर्थं "[2]तादौ" इति सूत्रे कृद्ग्रहणम् इति भाष्योदाहृतवार्त्तिकार्थः॥ "तादौ" इति सूत्रेण गतेः स्वरो विधीयते क्रियायोगेच गतित्वम्। क्रियावाची च धातुः। तच्च तिङन्ते पूर्वपदाभावेन कृदन्ते एव सिद्धमितिकृद्ग्रहणमुक्तार्थम्। न च कृद्ग्रहणाभावे तादित्वमुत्तरपदस्य विशेषणं स्यात्। तथा च प्रतरितेत्यादावेव स्यादिति तस्य कृद्विशेषणत्वाय तदिति वाच्यम्। श्रुतनित्यप्रत्ययविशेषणताया एव न्याय्यत्वादितिदिक्॥ ननु रेफस्य परादित्वेऽपृक्तत्वाऽभावाद्धिलोपो न प्राप्नोतीति कुतो नोक्तमत आह

अन्तरङ्गत्वादिति। (कै)

तदानीं सुपोऽभावादाह

कल्पनायामिति। (कै)

पदस्य विभज्यान्वाख्यानमिति भावः

---

१ अ ७। पा २। सू ८॥ २ अ ६। पा २। सू ५०॥

पूर्वान्तेति। (कै)

नार्कुटादौ वचनेनैव निर्वाहो भाष्ये उक्त इति बोध्यम्। एवं च रपर इति अवयववाचिपरशब्देन षष्ठ्यर्थे बहुव्रीहिरितिध्वनितम्। अवयवत्वं चावयवसादृश्ये पर्य्यवस्यति न हि वर्णस्य वर्णान्तरमवयवो भवति अत एव प्रसङ्गावस्थायां रपरत्वे गुणादिशब्देन विधानं "[1]यदागमा" इति न्यायेन विशिष्टस्य गुणादित्वात्। एवं च ऋवर्णादचि पूर्वपरयोरन्तरतमो रपरोऽण् भवतीत्यर्थ इति बोध्यम्। गुणादिशब्देनाऽरारोर्ग्रहणाऽभावे तु ऋकारस्य गुणवृद्धी अरारावेव इति नियमो न स्यात्। गुणादिशब्देन अकारादे रेफः परो यस्मात् तादृशस्य विधानं गुणत्वादिकं चाकारादिनिष्ठमेव तेन च नान्तर्य्यम्। एतदेवाभिप्रेत्य "[2]रदाभ्याम्" इति सूत्रे भाष्ये "गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्त्तत" इति वक्ष्यति। अतएव "[3]यद्यन्त इति वर्त्तते ततः पूर्वान्त" इत्युपक्रमस्यभाष्यमेकदेश्युक्तिः। तथाहि सति यथा परादिपक्षे नार्कल्पिरित्यादौ रेफस्य कल्पीतिसमुदायावयवत्वोपपत्तये परत्वपर्य्याप्त्यधिकरणादिरित्यर्थस्तथा "पूर्वान्त" इत्यस्य पूर्वत्वपर्य्याप्त्यधिकरणान्त इत्यर्थापत्तौ उक्तदोषो "रदाभ्याम्" इति सूत्रस्यभाष्यविरोधश्चेत्याहुः॥

---

१ परिभाषेन्दु-११॥ २ अ ८। पा २। सू ४२॥
३ अत्रैवोक्तं भाष्ये॥

अलोऽन्त्यस्य। १। १। ५२॥

भाष्ये "[1]प्रसज्येत" इत्यनन्तरं तन्निवृत्तये अनेकाल् सर्वस्य इति वाच्यं स्यादिति शेषः॥ नन्वलन्त्यस्येत्युच्यमाने सूत्रभेदः स्यादत आह

प्रथमेति। (कै)

बहुलस्याविवक्षितत्वं दर्शयितुमेवमुक्तमिति भावः॥

प्राप्नोतीति। (कै)

लोपस्याभावरूपत्वेनाऽलृरूपत्वाऽभावादिति भावः। एवंचायं पचो दुष्ट एव। "[2]क्ङिच्चाऽचि" इति लोपे प्राप्ते "[3]लुग्वा दुहः" इति लुग्ग्रहणस्य प्रथमान्तपचेऽलृग्रहणमनेकाल्भिन्नलक्षकमित्यर्थ-ज्ञापकत्वमिति नाऽयं दोष इति भाष्याशयमन्ये॥ भाष्ये

इदं नियमार्थमिति। (भा)

इदमा सूत्रं न परामृश्यते। अप्राप्तान्त्यादेशविध्यर्थत्वात्तस्य किन्त्वन्त्यदमिति तस्य नियमार्थमुपपादयति

अन्त्यस्येति॥ (कै)

अलोऽपीति। (कै)

अलात्मकादेशस्याऽपीत्यर्थः। अपिना अनेकाल्ऽपि॥

---

१ अनेकालप्यादेशोऽन्त्यस्य प्रसज्येत। भा॥

२ अ ७। पा ३। सू ७२॥ ३ अ ७। पा ३। सू ७३॥

न त्विति। (कै)

"[1]षष्ठी स्थान" इत्यनुवर्त्त्य स्थानषष्ठीबोधितान्त्यस्य इति व्याख्यानादित्यर्थः॥ यत्तु "[2]यथातथयथापुरयोरि"ति सूत्रे "न यथातथाऽयथातथा अयथातथाभाव आयथातथ्यमि"ति भाष्यदर्शनात् तत्प्रामाण्येन निपातसमुदायात् प्रत्ययो निपातसमुदायेन नञ्समास इत्यङ्गीकार्य्यम्। तच्च अयथातथाग्रहणात् ष्यञि "[3]यस्येति" लोपोऽवर्णान्ताङ्गस्य भसंज्ञकस्य जायमानस्तदन्तस्य यथातथेति पदसमुदायस्य स्यादिति तन्न। निर्दिश्यमानपरिभाषया सिद्धेः। तदनाश्रयेण वा तदुक्तिः॥

पदस्य त्विति। (कै)

अधिकृतस्य पदस्येत्यस्य वस्वादिभिर्विशेषणादित्यर्थः॥

यदि खल्विति। (भा)

पराभिप्रायं वदता सूचितमन्यादृग्रं स्वाभिप्रायं प्रकटयति।

अवश्येति॥ (कै)

असौ योगः। (कै)

"[4]अनेकाल् शित्" इति योगः। "[5]अतो भिस" इत्यादौ "[6]आदेः परस्य" इत्यादिबाधनार्थ इति भावः॥ नन्वस्यावश्यकत्वेऽ"[7]न्यविशेषणेऽपी"त्यादिग्रन्थोऽसङ्गतोऽत आह

---

१ अ १। पा १। सू ४९॥ २ अ ७। पा ३। सू ३१। "अयाथातथ्यम्" इत्यपि॥ ३ अ ६। पा ४। सू १४८॥ ४ अ १। पा १ सू ५५॥ ५ अ ७। पा १। सू ९॥ ६ अ १। पा १। सू ५४॥ ७ अन्यविशेषणेऽपि सति तन्न करिष्यते। भा॥

अथेति । (कै)

अल् इति प्रथमान्तं मण्डूकानुवृत्त्या "आदः परस्य" इत्यत्र सम्बध्यते इत्यैसादौ न दोषः । तातञ्यपि ज्ञापकात् सर्वादेशत्व-मविष्यतीति भावः ॥ भाष्ये

ङिदेवाऽनेकालन्त्यस्येति । (भा)

अल्रूपङिदित्यस्य फलाभावादनेकालिति लभ्यम् । एवंचास्य सूत्रस्यानेकालादेशेऽप्रवृत्त्यैतत्साहचर्य्याद् "आदेः परस्य" इत्यस्या-ऽप्यनेकालादेशेऽप्रवृत्तिरिति दिक् ॥

किमर्थं पुनरिति । (भा)

किं स्थानषष्ठीनिर्देशविषयमुत षष्ठीमात्रविषयमिति प्रश्नः । "स्थाने विज्ञातस्य" कस्येत्यपेक्षायामाह

षष्ठीति । (कै)

स्थाननिरूपितसम्बन्धार्थकत्वेन ज्ञातस्य षष्ठीरूपप्रत्ययस्येत्यर्थः ॥ नन्वेवं विज्ञाताया इति वक्तुं युक्तमत आह

आदेश इति । (कै)

स्थानषष्ठीसम्बन्धादादेशत्वेन यो विज्ञात इत्यर्थः । अन्ये तु "आलोऽन्त्यस्य" इति यदुच्यते तेन स्थाने विज्ञातस्य समुदाय-स्थाने प्रसक्तस्यान्त्येऽन्त्यनुसंहार उपसंहारस्तत्स्थानिकत्वमात्रं क्रियते बोधत इति भाष्याचरार्थः ॥ "स्थाने विज्ञातस्य" इत्यस्य व्याख्या स्थाने प्रसक्तस्य इति कैयटव्याख्याने एतद्वैयर्थ्यं भातीत्याशङ्कः ॥

षष्ठीमाचमिति । (कै)

उपलक्षणमेतत् । षष्ठीमाचोच्चारणेन विधीयमानं चेत्यपि बोध्यम् ॥

ततो यदुक्तमिति । (कै)

आकारावयवत्वप्रणिदापयतीत्यादौ णत्वं न स्यादित्यर्थः । न च अवयवावयवः समुदायावयव इति निर्वाहः । यस्याऽवयवस्तच्च तद्विशिष्टे यच्च तदवयववृत्तिधर्मबुद्धिस्तादृशस्यावयवावयवस्य समुदायावयवत्वबुद्धिर्हि लोकसिद्धा यथा भुजावयवाङ्गुल्यादिविशिष्टे भुजत्वबुद्धिसत्त्वात्तदवयवैकशरीरावयवत्वबुद्धिरङ्गुल्यादौ । न चैवमचाऽऽकारावयवपकारादिविशिष्टे वर्णत्वबुद्धिः । अर्थवत आगमेन तु तद्विशिष्टे तदर्थवत्त्वबुद्ध्या तद्बुद्धिसत्त्वेन भवत्येव समुदायावयवत्वमिति भवितेत्यादावङ्गावयवत्वं सम्भवतीति दृढो गुणनिषेधश्चारितार्थ्यमपि । वर्णस्य वर्णावयवत्वन्तु वाचनिकं गौणं तच्च यावद्वचनं वाचनिकमिति न्यायेन समुदायावयवत्वे मानाभाव इत्याशयः ॥

सम्बन्धार्थमिति । (कै)

अन्त्यस्येत्यनेनेति भावः ॥

शास्त्रे येति । (कै)

या षष्ठी सा स्थानेयोगैव सा चाऽन्त्येऽस्तीति तु नार्थः । स्थानेयोगेति पदाऽऽवृत्त्यापत्तेः । इदमेव प्रतिपत्तिगौरवं तस्माच्छास्त्रे या षष्ठी सा स्थानेयोगैवाऽन्त्येऽस्त्येव चेति वाक्यार्थ इति भावः ॥

सा चेति । (कै)

सा षष्ठी स्थानेयोगैव चेत्यन्वयः । स्थानेयोगत्वमेव बाध्यत इति । अत्र हेतुमुल्येत्यादिरुपपत्त्येत्यन्तः ॥

सम्बन्धस्येत्यादि । (कै)

सम्बन्धनिरूपकस्य सम्बन्धनिरूपकान्तरेणेत्यर्थः । सन्नियोगशिष्टन्यायस्तु न परिभाषाविषये । "[1]तस्मिन्नि"त्यादेरुत्तराङ्गविकलायास्तत्र तत्रोपस्थितिस्वीकारादित्याशयः ॥

इत्यनेन बाध्यत इति । (कै)

न "[2]ल्वाद्यन्तौ टकितावि"त्यनेनेति भावः ॥

ङिच्च । १ । १ । ५३ ॥

भाष्ये

कस्मान्नभवतीति । (भा)

येन नाप्राप्तिन्यायेनाऽस्थानेकालित्यस्यापवादत्वादिति भावः । उत्तरस्य त्वयं भावः । नेदमपूर्वविधायकं किन्तु तत्र तत्र ङित्करणसामर्थ्यसिद्धानेकालित्येतद्बाधाऽनुवादकम् । अनुवादफलन्तु ङित्त्वसामर्थ्यादर्थान्तरकल्पनानिवृत्तिः । एवंच प्रकृते नास्य प्रवृत्तिः । प्रवृत्तौ हि शास्त्रस्यापूर्वविधायकतापत्त्या गौरवापत्तिः । एवंच

---

१ अ १ । पा १ सू ६६ ॥ २ अ १ । पा १ । सू ४६ ॥

यत्र सर्वादेशे ङित्त्वस्य वैयर्थ्यन्तत्र तद्बाधः । यत्र तु न तत्र न तद्बाध इति भावः ॥

विप्रतिषेधादिति । (भा)

परिभाषात्वविरोधादित्यर्थः । यदि सावकाशङित्त्वेऽपि प्रवृत्तिः स्यात् तदाऽनुवादत्वासम्भवेन परिभाषाप्रकरणविरोध इति भावः । यथा चैतत् तथाऽनुपदमेव स्पष्टी भविष्यति । "[1]विप्रतिषेधे परम्" इति शास्त्रपरत्वे तु ङित्त्वस्य सावकाशत्वोक्तिरसङ्गता स्यात् सूत्रसावकाशत्वमेव हि विप्रतिषेधे बीजं न त्वस्य सूत्रस्य सर्वादेशप्राप्तिविषये क्वचिच्चारितार्थ्यम् । अवश्यप्राप्तिरेव च बाध्यत्वे बीजं दृष्टम् । किं च । विप्रतिषेधशास्त्रपरवार्त्तिकव्याख्यानपरभाष्ये शास्त्रद्वयावकाशप्रदर्शनगैल्वीभाष्यकारस्य दृश्यते न चात्र तथोक्तमभगवता । यद्यप्यन्यचानुवादत्वं[2] दोष उक्तशा[3]स्त्रस्य तथाऽपि परिभाषाणान्नियमरूपत्वेन तासु गुण एव तत्र हि प्राप्तानुवादादेवेतरनिवृत्तिरर्थात् । यथा "व्रीहीनवहन्ति" इत्यवघातानुवादेन नखविदलादिनिवृत्तिः । यथा च "तस्मिन्नि"त्यादौ प्राप्तपूर्वस्येत्यायनुवादेन परादिनिवृत्तिः । किं च [4]टप् यप् अबादिष्वनन्यार्थपित्त्वेषु चरितार्थस्य "[5]अनुदात्तौ सुप्पितौ" इत्यस्य जित्वरीत्यादौ तुक्संपादनेन चरितार्थपित्त्वे क्वरपि अन्तरङ्गेण प्रत्ययोदात्तत्वेन बाधापत्तिस्तदाह

---

१ अ १। पा ४। सू २॥ २ शास्त्रस्य। क। ग। इ॥
३ अत शास्त्रस्य इति नास्ति क ग इ पुस्तके॥
४ कप् पप् अनादिषु। क। ग। इ॥ ५ अ ३। पा १। सू ४॥

Nyayabindutīkā, (Text) ... ... Rs. 6 10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II. Fasc. 1-3 @ /6/ each 3 6
Padumawati Fasc. 1-3 @ 2/ 6 0
Pariciṣṭa Parvan. (Text) Fasc. 1-5 @ /6/ each 1 14
Prākṛita-Paingalam, Fasc. I 0 6
Prithivirāj Rāsa, (Text) Part II, Fasc. 1-5 @ /6/ each 1 14
Ditto (English) Part II, Fasc. 1 ... ... 0 12
Prākṛta Laksaṇam, (Text) Fasc. 1 ... ... 1 8
Parāçara Smṛti, (Text) Vol. I, Fasc. 1-8; Vol. II. Fasc. 1-6; Vol. III. Fasc. 1-6 @ /6/ each 7 8
Parāçara, Institutes of (English) 0 12
Prabandhacintāmaṇi (English) Fasc. 1-3 @ /12/ each 2 4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5-10; II, 1-6; III. 1-7; IV, 1-6; V, 1-8. @ /6/ each Fasc. 12 6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1-4 @ /6/ each 1 8
Ditto (English) Fasc. 1-3 @ /12/ each 2 4
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ /12/ 0 12
*Taittereya Saṁhitā, (Text) Fasc. 12-45 @ /6/ each 12 12
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1-19 @ /6/ each 7 2
Tattva Cintāmaṇi, (Text) Vol. I. Fasc. 1-9, Vol. II. Fasc. 1-10, Vol. III. Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-10 @ /6/ each 13 14
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/ 0 12
Tul'si Sat'sai, (Text) Fasc. 1-5 @ /6/ each 1 14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1-2 @ /6/ each ... 0 12
Uvāsagadasāo, (Text and English) Fasc. 1-6 @ /12/ 4 8
Varāha Purāṇa, (Text) Fasc. 1-14 @ /6/ each 5 4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2-6; Vol. II, Fasc. 1-7, @ /6/ each 4
Visnu Smṛti, (Text) Fasc. 1-2 @ /6/ each 0 12
Vivādaratnākara, (Text) Fasc. 1-7 @ /6/ each 2 10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1-6 @ /6/ 2 4
Vṛhat Svayambhū Purāṇa, Fasc. 1-5 ... ... 1 14

Tibetan Series.

Pag-Sam Thi S'īñ, Fasc. 1-4 @ 1/ each 4 0
Sher-Phyin, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-3; Vol. III, Fasc. 1-5, @ 1/ each 13 0
Rtogs *brjod dpag bkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each 10 0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1-13 @ /6/ each... ... 4 14
Al-Muqaddasi (English) Vol. I, Fasc. 1-2 @ /12/ 1 8
Āīn-i-Akbarī, (Text) Fasc. 1-22 @ 1/ each 22 0
Ditto (English) Vol. I, Fasc. 1-7, Vol. II, Fasc. 1-5, Vol. III, Fasc. 1-5, @ 1/12/ each 29 12
Akbarnāmah, with Index, (Text) Fasc. 1-37 @ 1/ each 37 0
Ditto English Fasc. 1-5 @ 1/ each 5 0
Arabic Bibliography, by Dr. A. Sprenger 0 6
Bādshāhnāmah, with Index, (Text) Fasc. 1-19 @ /6/ each 7 2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each 3 0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/ each 21 0
Farhang-i-Rashīdī, (Text) Fasc. 1-14 @ 1/ each 14 0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1-4 @ /12/ each 3 0
Futūh-ush-Shām of Wāqidī, (Text) Fasc. 1-9 @ /6/ each 3 6
Ditto of Āzādī, (Text) Fasc. 1-4 @ /6/ each 1 8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ... 0 12
History of the Caliphs, (English) Fasc. 1-6 @ /12/ each 4 8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1-3 @ /6/ each 1 2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each 38 4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10-12 @ /6/ each 13 2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ...	Rs.	1	14
Muntakhabu-t-Tawārikh, (Text) Fasc. 1–15 @ /6/ each		5	10
Muntakhabu-t-Tawārikh, (English) Vol. I, Fasc. 1–7; and 2 Indexes Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each		7	2
Ma'āṣir-i-'Ālamgīrī, (Text) Fasc. 1–6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Niẓāmī's Khiradnāmah-i-Iskandarī, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāẓu-s-Salātīn, (Text) Fasc. 1–5 @ /6 each		1	14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each		4	0
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wīs o Rāmīn, (Text) Fasc. 1–5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl. @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882. (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members			
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki Language as spoken in Eastern Turkistan by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
9.	Jawāmiu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
10.	Khizānatu-l-'ilm	4	0
11.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
12.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
13.	Sharaya-ool-Islām	4	0
14.	Tibetan Dictionary, by Csoma de Körös	10	0
15.	Ditto Grammar ,, ,, ...	8	0
16.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0

	Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
	Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

30-7-1900.

Books are supplied by V-P.P.

PK
531
A15
1899
v.1
pt.6

Pātañjali
Mahabhasyapradipodyotah

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY